सव्याख्यानाष्टावक्रप्रारंभः

श्रीगणेशायनमः॥ ॥सच्चिदानंदमद्वैतंसर्वाधिष्ठानमुत्तमं।नत्वाष्टावक्रसूक्तस्यदीपिकातन्यतेपरा॥इहखलुज्ञानविज्ञानसंप
न्नःपरमकारुणिकोष्टावक्रोमुनिर्मुक्तिकामनयासमुपेतंकंचिच्छिष्यंशमदमाद्यधिकारस्वीकारोपदेशपूर्वकमात्मतत्वमुप
दिशति।मुक्तिमिच्छसीति।तातेतिसान्त्वग्रहसंबोधने।हेशिष्यचेत्त्वंमुक्तिंसर्वानर्थनिवृत्तिपरमानंदावाप्तिरू
पामिच्छसि।तर्हिविषवत्यथाविषमनर्थहेतुत्वात्त्यज्यते।तथाविषयान्देहादीननर्थहेतुभूतांस्त्यज।
तत्राहंममेत्यध्यासादासक्तिमाकार्षीरित्यर्थः।अनेनबाह्यपदार्थाभिषंगत्यागोपदेशेनबाह्येंद्रियनिग्रह
रूपदमांगीकारउपदिष्टः।अर्थात्तत्कृत्वानिग्रहरूपशमांगीकारस्तूदिष्टइति।क्षमेतिक्षमादिकंयथापीयूषंअ

मुक्तिमिच्छसिचेत्तातविषयान्विषवत्त्यज॥क्षमार्जवदयातोषसत्यंपीयूषवद्भज॥१॥नपृथ्वीनजलंनाग्नि
र्नवायुर्द्यौर्नवाभवान्॥एषांसाक्षिणमात्मानंचिद्रूपंविद्धिमुक्तये॥२॥

र्थहेतुत्वात्सेव्यतेतथासेवस्वेत्यर्थः।यद्वासाधनचतुष्टयसंपन्नमधिकारिणंशिष्यंप्रतिभगवानष्टावक्रोमुनिर्मुप
दिशति॥१॥ननुपांचभौतिकोदेहएवात्मातथाचक्षुतानांतद्धर्माणांचत्यागोनसंभावितः।नहिपृथिव्यादिनास्वभाव
भूतोगंधादिःकालत्रयेपित्यक्तुंशक्य।पृथिव्यादिरूपस्त्वंनभवसीत्याह।नपृथ्वीति।हेशिष्यपृथिव्यप्तेजोवा
य्वाकाशात्मकस्थितधर्मरूपस्त्वंनभवसि।ततस्तन्नामनात्मधर्मान्विषयांस्त्यजेत्यर्थः।नन्वहंगौरस्थूलइत्यादिप्रतीतेःपांचभौ
तिकोदेहएवात्मेत्यतआह।एषामिति।एषांदेहादीनांसाक्षिणमेवात्मानंविद्धिसाक्षीकुरु।तथाचदेहादेःसाक्षीआत्मा
देहादिभ्योभिन्नःयथाघटद्रष्टाघटाद्भिन्नइत्यर्थः।नैयायिकाभिमतमात्मानंनिराकरोति।चिद्रूपमितिआत्मज्ञानस्य ॥२॥
फलमाहमुक्तयइति॥२॥

चित्तवृत्तिनिरोधरूपः समाधिरेव केवलो बंधनिवृत्तिहेतुरिति पातंजलमतमपाकर्तुमाह । निःसंग इति । हे शिष्य त्वं वस्तुतो निःसंगः सर्व
तथा बंधशून्योसि निष्क्रियोसि क्रियारहितोसि । अत्र हेतुमाह । स्वप्रकाशो निरंजन इति निष्क्रियस्य समाध्यनुष्ठानेयत्नस्य अयमेव हि निश्चितं तव बंधः । तथा च ज्ञा
नातिरिक्तोपायानुष्ठानमात्रं प्रत्युत बंध एवेत्यर्थः ॥१४॥ तदेवमात्मज्ञानातिरिक्तः समाधिरपि पूर्वं निराकृतः अथ परिपूर्णशुद्धबु
द्धात्मनि विपरीतधियमुत्सारयन्नेव चित्तनिष्ठामुपसंहरति श्लोकद्वयेन । त्वयेति । हे शिष्य इदं विश्वं त्वया व्याप्तं कनकेनेव कटककुंड
लादिकं । तथा इदं विश्वं त्वयि प्रोतं मृदीव घटशरावादिकं । हे शिष्य त्वं यथार्थतः परमार्थतः शुद्धः अविद्यातत्कार्यदोषकालातीतः शुद्ध
ति बुद्धस्वप्रकाशचिद्रूपोसि । एवं च सर्वरसः सर्वगंधः सर्वरसो नेति नेतीति चेति श्रुतिद्वयानुसारेण । क्रमाभ्यामध्यारोपापवादाभ्यां निःप्रपंचमा

निःसंगो निःक्रियोसि त्वं स्वप्रकाशो निरंजनः । अयमेव हि ते बंधः समाधिमनुतिष्ठसि ॥१४॥ त्वया व्याप्तमिदं विश्वं त्व
यि प्रोतं यथार्थतः । शुद्धबुद्धस्वरूपस्त्वं मागमः क्षुद्रचित्ततां ॥१५॥ निरपेक्षो निर्विकारो निर्भरः शीतलाशयः । अ
गाधबुद्धिरक्षुब्धो भव चिन्मात्रवासनः ॥१६॥ ॥ ॥

त्मतत्त्वमुपदिष्टं भवति । हे शिष्य परिपूर्णशुद्धबुद्धस्वरूपस्त्वं क्षुद्रचित्ततां विपरीतचित्तवृत्तिं मागमः माकार्षीरित्यर्थः ॥१५॥
प्रतीयमानो षडूर्मयः षड्भावविकारा न त्वद्गता स्तनुतद्गुललक्षण इत्याह । निरपेक्ष इति । हे शिष्य त्वं निरपेक्षः अशनापिपासादि
षडूर्मिसंसर्गातीतः तथा निर्विकारः जायते अस्ति वर्धते विपरिणमते अपक्षीयते नश्यतीत्येवं विधाये विकाराः प्रोक्ताः षड्भा
वविकारास्तत्संसर्गरहितः त्वमसीत्यर्थः । तर्हि कीदृशोहमित्यत आह । निर्भर इति निर्भरश्चिद्घनरूपः शीतलः सुखस्वरूपः आमुक्तिसमय न
मभिव्याप्य शेते तिष्ठतीत्याशयः अगाधाः अतलस्पर्शा अपरिच्छिन्ना बुद्धिस्वरूपचैतन्यं तद्रूपः अक्षुब्धः अविद्याकृतक्षोभरहितः त्वं वस्तु
तोसि । अतस्त्वं क्रियामाचरहितश्चिन्मात्रनिष्ठो भवेत्यर्थः ॥१६॥ ॥ ॥ प्रथमप्रकरणं ॥ ॥श्रीकृष्णायनमः ॥ ॥ ॥छ॥ ॥छ॥

ननुसर्वंरज्जुसर्पवत्कल्पितत्वादभाववत्स्यात्तदएवात्मेतिचेत्तर्हिंबंधमोक्षावात्मनः किंनिबंधनावित्याशंक्याहमुक्ताभिमानीति। हिनि
श्चितंमुक्ताभिमान्येवमुक्तः अपिबद्धाभिमानीबद्धः अत्रकिंवदंतीप्रमाणयंतिकिंवदंतीतियामतिःसागतिर्भवेत्। इयंहिप्रसिद्धा
किंवदंतीविद्वज्जनःश्रुतिःसत्याअबाधितार्था। तंविद्याकर्मणीसमन्वारभेतेपूर्वप्रज्ञाचेतिश्रुतिपरिगृहीतत्वात्। येयंवापिवाभि
मानिकावेवबंधमोक्षौननुवास्तवावित्यर्थः पूर्वोक्तोप्ययमर्थोदुर्बोधत्वात्पुनःपुनःशिष्यबोधार्थस्मरत्भावभित्यादिस्मृति
परिगृहीतत्वाद्वा। तथाचामुख्यतद्व्यदोषः॥११॥ ननुजीवात्मानःपारमार्थिकावेवबंधमोक्षाविवतार्किकाशंकामपाकर्तुमाह। आत्मेति।
आत्माभ्रमात्देहस्यवत्मनताहमन्यभ्रमात्संसारवानिवप्रतीयतेननुवस्तुतःसंसारी। अत्रदृष्टांतमाह। साक्षीति। कर्तुरहंकारादेःसाक्षीन
कर्ता विभुः विविधंभवत्यस्माद्विभुःसर्वाधिष्ठानं। पूर्णंव्यापकंएकःसजातीयविजातीयःस्वगतभेदरहितःमुक्तःसत्वात्मायाचत्कार्यातीतःक्रि
यास्वक्रियायाश्चैतन्यरूपअक्रियःसर्वव्यापाररहितःअसंगःसर्वसंबंधशून्यः। असंगोह्ययंपुरुषइतिश्रुतिः निस्पृहःविषयाभिलाषरहितःशांतःप्र
वृत्तिनिवृत्तिरहितःस्तस्माद्वस्तुतोनसंसारीत्यर्थः॥१२॥ अहंहिपरिछिन्नोममेदंदेहोःसुखीदुःखीचाहमितिभ्रमस्य। नादिपरंपरागतस्य दृकं
आत्मासाक्षीविभुःपूर्णएकोमुक्तश्चिदक्रियः असंगोनिस्पृहःशांतोभ्रमात्संसारवानिव॥१२॥ मुक्ताभिमानीमुक्तोहिबद्धोबद्धा
भिमान्यपि। किंवदंतीहसत्येयंयामतिःसागतिर्भवेत्॥११॥ कूटस्थंबोधमद्वैतमात्मानंपरिभावय। आभासोहंभ्रमंमुक्त्वाभावंबा
ह्यमथांतरं॥१३॥ देहाभिमानपाशेनचिरंबद्धोसिपुत्रक। बोधोहंज्ञानखड्गेनतन्निःकृत्यसुखीभव॥१३॥
सकृद्भावनयानिवर्तयितुमशक्यत्वाद्दांतवन्निरसकृदुपदेशादित्याशयसूत्राद्वापुनःपुनरद्वैतात्मभावनांविज्ञापयेतोभावनानिवृत्तिपुरः
सरामुपदिशति। कूटस्थमिति। हेशिष्यआभासोहंअहंकारोहमितिभ्रमंमुक्त्वाबाह्यंभावंममेदंदेहादिकमितिबाह्यपदार्थविषयंभावं।
अथवांतरभावंसुखीदुःखीमूढोहमितिआंतरपदार्थविषयंभावंभावनांमुक्त्वात्यक्त्वाकूटस्थमसंगबोधस्वरूपमद्वैतंआत्मानंपरि
समंताद्व्यापकंभावयेरित्यर्थः॥१२॥ अनादिरयंदेहाभिमानःसकृद्भावनयाननिवर्ततइतिपुनःपुनर्ज्ञानखड्गेनतंनिःकृत्यसुखीभ
वेत्याह। हेपुत्रशिष्यत्वंदेहेअहमित्यभिमानपाशेनचिरंबहुकल्पंबद्धोसि। अतोबोधोहंचिद्रूपोहमितिविज्ञानखड्गेनपुनःपुनःतं
देहाभिमानेति
पाशंनिःकृत्यनितरांस्थित्वासुखीभव॥१३॥ ॥श्रीरामायनमः॥ ॥७॥

ननु शुद्धबुद्धस्वभावस्यैकस्य नित्यमुक्तस्यात्मनो बंधः किंनिबंधनो यस्य बंधस्य निवृत्त्यर्थं विवेकिनो यतंते इत्याशंक्य नित्य
मुक्तस्यापि प्रातीतिकं बंधहेतुमाह। एक इति। हे शिष्य सर्वस्य द्रष्टा प्रतिशरीरमेकस्त्वमसि। ततश्च व्यापकत्वात् सर्वदा मु
क्तप्रायोसि देहाध्यासवशात् बंधे प्रतीयमानेपि वस्तुतस्त्वं मुक्तोसीत्यर्थः। अयमिति। हि निश्चितं अयमेव ते बंधो यदीतरं दे
हादिरूपं परिछिन्नं द्रष्टारं पश्यसीत्यर्थः॥६॥ पूर्वकर्मबंधहेतुरुक्तः अथानर्थहेतुं वदन्नेव तन्निवृत्तिपरमानंदप्राप्त्यु
पायमनुवदति। अहं कर्तेति। हे शिष्य अहं कर्तेत्येवंरूपो योहंमानः अहमिति आत्मनि कर्तृत्वाभिमानस्तद्रूपो महान् कृ
ष्णसर्पः सुखदुःखविषावहस्तेन दंशितः कवलीकृतो ततः कारणात् नकर्ता अहं अकर्ता आत्मा इत्येवंरूपं विश्वासामृतं पी

एको द्रष्टासि सर्वस्य मुक्तप्रायोसि सर्वदा॥ अयमेव हि ते बंधो द्रष्टारं पश्यसीतरं॥६॥ अहं कर्तेत्यहंमानमहाकृ
ष्णाहिदंशितः। नाहं कर्तेति विश्वासामृतं पीत्वा सुखी भव॥७॥ एको विशुद्धबोधोहमिति निश्चयवह्निना॥
प्रज्वाल्याज्ञानगहनं वीतशोकः सुखी भव॥८॥ यत्र विश्वमिदं भाति कल्पितं रज्जुसर्पवत् आनंदपरमानंदः स
बोधस्त्वं सुखं चर॥९॥ ॥

त्वा अनुभूय सुखी भव प्राप्तपरमानंदो भवेत्यर्थः॥७॥ एको विशुद्धबोधोहमिति। एकः सजातीयविजातीयस्वगतभेदरहितः
विशुद्धबोधः स्वप्रकाशोविरहात्माहमिति निश्चयाग्निना अज्ञानमयं गहनं वनं प्रज्वाल्य प्रकर्षेण दग्ध्वा मोहरागद्वेषप्रपंचनिज
म्भापायाद्वीतशोको विगतदुःखः सन् सुखी भवेत्यर्थः॥८॥ कर्मबंधहेतुरुक्तः। ननु ज्ञानेन अज्ञाननाशे सत्यपि सत्यस्य
प्रपंचस्य ज्ञानादिनिवृत्तेर्वीतशोकः कथं स्यादित्याशंक्य प्रपंचस्य रज्जुभुजंगतुल्यत्वात् ज्ञानाद्धि निवृत्तौ दुःखहेतोरभा
वात् वीतशोकता स्यादेवेत्याह। यत्रेति। यत्र बोधे इदं विश्वं रज्जुसर्पवत् कल्पितं अधिष्ठानाज्ञानकल्पितं भाति। स बोधः ख्यातः त्वं सुखं चर।
यथा स्वप्नदशायां मृगाज्ञानकल्पितं व्याघ्रादिकं जाग्रद्बोधे विनिवर्तते सुखं चरति। तद्वदित्यर्थः। ननु दुःखहेतुप्रपंचनिवृत्तौ दुःखाभावमात्रं स्यात् सुखं
तु कथं स्यादित्याशंक्य स्वभावत एव त्वं नित्यानंदस्वरूप इत्याह। आनंदेति। आनंदेभ्यो मनुष्यलोके देवलोकानंदेभ्यः परम उत्कृष्ट आनंदस्त्वमसि

त्यर्थः॥ एतस्यैवानंदस्यान्यानि भूतानि मात्रामुपजीवंतीति श्रुतेः॥९॥ ॥

आत्यंतिकदुःखनिवृत्तिर्मुक्तिरिति नैयायिकाः। दुःखप्रागभावपरिपालनं मुक्तिरिति प्राभाकराः। आत्महानं मुक्तिरिति बौद्धाः इत्यादिभ्र
मान्निराकुर्वन्नेवात्मज्ञानेन जीवन्मुक्तदशामाह। यदीति। हि शिष्य यदि त्वं देहं पृथक्कृत्य देहादिभ्यो विविच्य। चिति विश्रम्य चिदेकाग्रो
भूत्वा तिष्ठसि। तर्हि त्वमधुनैव इदानीं जीवद्दशायामेव सुखी प्राप्तपरमानंदः अतएव शांतः सुप्रसन्नमनाः बंधमुक्तः कर्तृत्वभोक्तृ
त्वप्रमुखानर्थरहितो भविष्यसीत्यर्थः॥३॥ ननु वर्णाश्रमप्रयुक्तानि कर्माणि विहाय चिति विश्रम्यावस्थानं कथं युक्तमित्याशंक्या
त्मनो वर्णाश्रमादिधर्मलक्षणत्वमाह॥ न त्वमिति। त्वं वर्णाश्रमित्वादिविलक्षण इत्यर्थः। न त्वं ब्राह्मण इत्यादिशास्त्रप्रत्यक्षब
लात्। तत्त्वैव वर्णाश्रमित्वमित्याशंक्याह। नाक्षगोचर इति। अयं ब्राह्मण इत्यादिप्रत्ययास्तु देहगोचरा एव न त्वात्मगोचराः स्त्वं त्विंद्रि
यकज्ञानागोचरत्वादित्यर्थः। तर्हि कीदृशोऽहमित्याशंक्यात्मानं निरूपयन्नेव तद्बुद्धिनिष्फलमनुवदति। असंगः सर्वोपाधिसं
गरहितः निराकारो विश्वसाक्षी त्वमसि। अतश्चासंगादिरूपस्य तव वर्णाश्रमविलक्षणत्वात् कर्मासक्तिपरिहाराय चितिवि

यदि देहं पृथक्कृत्य चिति विश्रम्य तिष्ठसि। अधुनैव सुखी शांतो बंधमुक्तो भविष्यसि॥३॥ न त्वं विप्रादिको वर्णो नाश्रमी नाक्षगो
चरः। असंगोऽसि निराकारो विश्वसाक्षी सुखी भव॥४॥ धर्माधर्मौ सुखं दुःखं मानसानि न ते विभो। न कर्तासि न भोक्तासि
मुक्त एवासि सर्वदा॥५॥

श्रम्य सुखी भव। प्राप्तपरमानंदो भवेत्यर्थः॥४॥ ननु वेदोदितकर्म विहाय चिति विश्रांतावपि प्रत्यवायप्रसंग इत्यत आह। धर्मा
धर्माविति॥ धर्माधर्मादयो मनोधर्मा एव कालत्रयेऽपि तैः सह तव बंधो नास्तीत्यर्थः। न कर्तेति। किं च विहितनिषिद्धकर्मक
र्तृधर्मादिद्वारा सुखदुःखभोक्तृत्वं तदपि तव नास्ति। शुद्धबुद्धस्वरूपत्वात्। त्वं सर्वदा मुक्त एव। अज्ञानमात्रविजृंभितबंधदुः
खे तु चिति विश्रांत्यैवाज्ञाननिरस्यानविजृंभिष्यते इत्यर्थः॥५॥

विषयान्विषवत्त्यज सत्यं पीयूषवद्भजेति मोक्षोपायः प्रथमश्लोके उपदिष्टः परं तु विषयाणां विषतुल्यत्वे सत्यात्मनः पीयूषतुल्य
त्वे च हेतुर्नोक्त इति तत्र हेतुं वदन्नेव षोडशश्लोकोपदेशो मोक्षहेतुश्चिदात्मा च स्वाध्यस्तं विश्वं समन्ततो व्याप्य चेष्टितो मुकुरे इव स्वा
ध्यस्तशरीर इति तद्बोधोपपत्तिरेव परमपुरुषार्थ इत्युपपत्तिमुखेन प्रकरणार्थं गृह्णाति श्लोकत्रयेण साकार इति अथ संग्रहश्लोकाः इत्यादिना। या
हि त्रिष्य साकारं शरीरादिकं अनन्तं मिथ्याभूतं विद्धि अनृतं तस्तद्बुध यथावत्त्यजेत्यर्थः। निराकारमात्मतत्त्वं निश्चयं कालत्रयावस्थायि विद्धि
सर्वसाक्षित्वान्नित्यं विज्ञानमानन्दं ब्रह्मेति श्रुतेश्च। अत एतत्तत्त्वे मिन्मात्रेणोपदेशेन तदुपदिष्टमानेन तत्रैव विश्रम्यावस्थानेन न पुनर्भवस्य
संभवासिद्धिरित्यर्थः॥१७॥ अथ वर्णाश्रमधर्मस्थूलशरीरात् पुण्यापुण्यधर्मकलिंगशरीरादि लक्षणपरिपूर्णचैतन्यं सदृष्टान्ते
न निरूपयति। यथैवेति। यथैवादर्शप्रतिबिंबिते शरीरादौ अन्तर्मध्ये परितो बाह्ये च आदर्शो व्याप्य वर्तते। तथैव स्वाध्यस्तेऽस्मिन्
स्थूलशरीरेऽन्तःपरितश्च परमेश्वरश्चिदात्मा व्याप्य स्थितः। तथा च यत्र विश्वमिदं भाति कल्पितं रज्जुसर्पवदित्यादिः सर्वोऽपि प्रकरणा
र्थः संक्षेपरूपस्थितः।२॥ आदर्शदृष्टान्ते परिच्छिन्नत्वादि भ्रमापत्तिः स्वाध्यस्तशरीरान्तर्वर्तित्वेन स्पष्टमतो घटाकाशदृष्टान्ते

साकारमनृतं विद्धि निराकारं तु निश्चलं॥ एतत्तत्त्वोपदेशेन न पुनर्भवसंभवः॥१७॥ यथैवादर्शमध्यस्थे रूपेऽन्तः प
रितस्तु सः। तथैवास्मिन्शरीरेऽन्तः परितः परमेश्वरः॥१८॥ एकं सर्वगतं व्योम बहिरन्तर्यथा घटे। नित्यं निरन्तरं ब्र
ह्म सर्वभूतगणे तथा॥१९॥ ॥इत्युपनिषत्श्लोकाः॥

त न बाह्याभ्यन्तरव्यापकत्वमाह। एकं सर्वगमिति। यथा सर्वगतमेकं नित्यं व्योम घटे पटादौ बहिरन्तश्च वर्तते। तथा नित्यमविना
शि ब्रह्म सर्वभूतगणे बहिरन्तश्च निरन्तरं सर्वदा वर्तत इत्यर्थः। एष त आत्मा सर्वान्तर इति श्रुतेः। अतश्च बोधोऽह
मिति ज्ञानखड्गेन देहाहंभावपाशं निकृत्य सुखी भवेत्यर्थः॥२०॥ ॥इति श्रीमद्विश्वेश्वरविरचितायामष्टावक्रटीका
यां प्रथमप्रकरणं॥ श्री॥ श्रीगुरुभ्यो नमः॥छ॥

॥४॥ इत्थं गुरुकृपापीयूषास्वादनुभवमात्मनः। आविष्करमाश्चर्यं शिष्यो निजगुरुं प्रति। तत्र तावच्छिष्यश्चिद्रूपात्मानुभवमाविःकुर्व
न्नेव गुरुकृतोपकारख्यापनाय प्राचीनसंस्कारवशात् बाधितानुवृत्त्या प्रतीतस्य मोहविडम्बनस्य स्मरणमाविःकरोति अहो
इति। अहमस्याः श्लोकस्यानुभवादहो इत्याश्चर्ये अहं निरञ्जनः सर्वोपाधिविनिर्मुक्तः शान्तः सर्वविकारातीतः प्रकृतेः परो मायां
धकारस्पर्शरहितो बोधः स्वप्रकाशः चिद्रूप इत्यर्थः। गुरूपकारख्यापनाय मोहविडम्बनमनुस्मरति। एतावन्तमिति। ए
तावन्तं गुरूपदेशावधिकं कालं मोहेन देहात्माविवेकेन विडम्बित एवासं। प्रतेतु श्रीगुरुप्रसादात्मानन्दात्मानुभवोऽस्मीति
निवासितोर्थः॥१॥ ॥पूर्वकालीनं मोहविडम्बनमुक्त्वा संप्रति गुरुप्रसादान्मम देहात्मविवेको जातस्तमुपपत्तिकमा
ह। यथेति। अहं यथा जगत् प्रकाशयामि तथैव एनं स्थूलदेहं प्रकाशयामि। तथा वदेहोनात्मा प्रकाशित्वाज्जगद्वदित्यर्थः।

अहो निरञ्जनः शान्तो बोधोऽहं प्रकृतेः परः। एतावन्तमहं कालं मोहेनैव विडम्बितः॥१॥ ॥यथा प्रकाशयाम्येको
देहमेनं तथा जगत्। अतो मम जगत्सर्वमथवा न च किंचन॥२॥ ॥सशरीरमहो विश्वं परित्यज्य मयाधुना। कुतश्चि
त्कौशलादेव परमात्मा विलोक्यते॥३॥ ॥[illegible] ॥

कल्पितजगदादिदेहात्मनोः संबंध इत्याशंक्य युक्तिविचाराभ्यां किं कः संबंधः परमार्थतस्त्वाश्रुनकश्चित् संबंध इत्याह। अतो ममेति
म अतो देहस्य त्वात्सर्वं देहप्रमुखं जगन्मे मदीयं मयाध्यस्तमित्यर्थः। अथवा परमार्थविचारे किंचन किमपि देहादिकं मम नैवेव म
ध्यस्तमित्यर्थः। तदेवमध्यारोपापवादाभ्यां प्रकृतेः परो बोधोऽहमिति स्वस्वरूपस्फुटीकृतं॥२॥ ननु लिङ्गदेहात्कारणदेहाच्चास्याविवे
विकाभावे कथं स्फुरत्वमित्याशंक्य ततोपि विवेकं जनितात्मानुभवमाह। सशरीरमिति। अहो इत्याश्चर्ये सशरी
रलिङ्गशरीरकारणशरीरसहिते विश्वं परित्यज्य विचारतः पृथक्कृत्वा निषिध्य कुतश्चिच्छास्त्राचार्योपदेशलब्धात्को
शलाच्चातुर्यादेव परमश्रेष्ठः आत्मा मया विलोक्यते। नान्यः परमात्मविलोकनोपाय इत्यर्थः॥३॥ ॥ ॥४॥

ज ससरीरविश्वस्य पृथक्सत्तया परित्यज्य सदृष्टांतं निरूपयति। यथा न तोयत इति। यथा तरंगफेनबुद्बुदाश्च न तोयतो भिन्नास्तदुपा
दानत्वात् तथा आत्मविनिर्गतं आत्मनः संजातं आत्मोपादानकं विश्वं आत्मनो न भिन्नमेवं च तोयतरंगादिवत्तद्यथा स्वच्छं मनुगतं
तथा स्वच्छं चिद्रूपोऽहं विश्वस्मिन्नधिष्ठानभूतोऽनुगतोऽस्मि द्रष्टव्यमित्यर्थः॥४॥ सदृष्टांतरेणात्मरूपतया सर्वं विलोकनीयं निरूपयति
तंतुमात्र इति। स्थूलदृष्टांतं तु वैलक्षण्येन प्रतीयमानोऽपि पटो विचारितः। विचारेण वीक्षितः सन्नुपद्रुतः यथा तंतुमात्रो भवेत्।
अस्ति तद्वत्। तथा इदं स्थूलदृष्ट्या अत्र सवैलक्षण्येनापि प्रतीयमानं युक्त्या विचारितं सत् आत्मतन्मात्रमेव आत्मसत्तामात्रात्मक
मेव। एतेन तंतुश्च स्वसत्तया पटेऽनुगतस्तथात्मापि स्वसत्तयाधिष्ठानभूतो विश्वस्मिन्ननुगत इत्यर्थः॥५॥ आत्मन्येव सर्वं व्या

यथा न तोयतो भिन्नास्तरंगाः फेनबुद्बुदाः। आत्मनो न तथा भिन्नं विश्वमात्मविनिर्गतं॥४॥ ॥तंतुमात्रो भवेदेव पटो
यद्वद्विचारितः। आत्मतन्मात्रमेवेदं तद्वद्विश्वं विचारितं॥५॥ यथैवेक्षुरसे क्लृप्ता तेन व्याप्तैव शार्करा। तथा विश्वम
पि क्लृप्तं मया व्याप्तं निरंतरं॥६॥ ॥आत्माज्ञानाज्जगद्भाति आत्मज्ञानान्न भासते। रज्ज्वज्ञानादहिर्भाति तत्
ज्ञानाद्भासते न हि॥७॥ ॥श्रीकृष्णाय नमः॥ ॥

प्तमित्यत्र दृष्टांतरमाह। यथैवेति। यथैव इक्षुरसे क्लृप्ता अध्यस्ता शार्करा तेन मधुररसेन व्याप्तैव सर्वापि व्याप्ता। तथैव
मपि नित्यानंदे स्वरूपे क्लृप्तमध्यस्तं विश्वं मया नित्यानंदेन निरंतरं व्याप्तं तस्मात् दृश्यमानेदात्मस्वरूपमेवेत्यर्थः।
तदेवमस्तिभातिप्रियमित्येवंरूपेणात्मैव सर्वत्रावस्थित इति श्लोकत्रयविवक्षितोऽर्थः॥६॥ ॥ विश्वं चिदात्मनो न भि
न्नं तर्हि न कारणेनेदं भासते। केन त्वकारणेन भासनमित्याशंक्याह। आत्माज्ञानादिति। आत्मनः अज्ञानात् जगद्भाति
तथा आत्मनः अधिष्ठानस्य ज्ञानान्न भासते। अधिष्ठानाज्ञानादस्य भाने अधिष्ठानज्ञानाभावेन लोकप्रसिद्धं दृष्टांतमा
ह रज्ज्वज्ञानादिति। हि यथा रज्जुस्वरूपस्याज्ञानात् अहिः सर्पो भाति तज्ज्ञानात् रज्जुज्ञानान्न भासते॥७॥ श्रीरामाय नमः॥ ॥

न्यस्याभा

॥५॥ ननु आत्मनः अज्ञाने सति आत्मप्रकाशाभावात् जगत्कथं भासते इत्याशंक्य स्वरूपचैतन्यबलादेवेत्याह। प्रकाश इति। प्रकाशो नित्यबोधः मेम
म निजं स्वाभाविकं स्वरूपं अहं ततः प्रकाशात् अतिरिक्तः भिन्नो नास्मि अतो मम यदा विश्वं प्रकाशते तेन तदाहं भासे मदात्मप्रकाशादेव भास
ते। स्वरूपचैतन्येनेवाज्ञासकं तदा कथं अज्ञानमिति चेन्नैवं। नहि स्वरूपचैतन्यमज्ञानविरोधि किंत्वज्ञानसाधकमेव। अन्यथा जडस्य सिद्धिरे
व न स्यात्। किं वा आत्मस्वरूपप्रकाशाभावे स्वात्मनोप्यसत्वं प्रसक्ति जगदाध्यप्रसंगश्च तस्माद्यदा विश्वप्रकाशते तदात्मस्वरूपप्रकाशादेवे
ति भावः॥८॥ ॥प्रकाशोप्यात्मनि अज्ञानवशात् विश्वं भासते इति महदाश्चर्यं सदृष्टांतमाह। अहो इति। स्वप्रकाशेऽपि मयि अज्ञानाद्विकल्पि
तं रचितमध्यस्तं विश्वं मयि भासते। अहो आश्चर्यमिदं यथा शुक्त्यादौ रूप्यादिकं भासते तद्वदित्यर्थः॥९॥ ॥ननु मायाया विकारित्वात्तत्रैव विश्वस्य

प्रकाशो मे निजं रूपं नातिरिक्तोऽस्म्यहं ततः। यदा प्रकाशते विश्वं तदाहं भास एव हि॥८॥ ॥अहो विकल्पितं विश्वमज्ञानान्मयि भासते।
रूप्यं शुक्तौ फणी रज्जौ वारि सूर्यकरे यथा॥९॥ ॥मत्तो विनिर्गतं विश्वं मय्येव लयमेष्यति। मृदि कुंभो जले वीचिः कनके कटकं यथा।
॥१०॥ ॥अहो अहं नमो मह्यं विनाशो यस्य नास्ति मे॥ ब्रह्मादिस्तंबपर्यंतं जगन्नाशेऽपि तिष्ठतः॥११॥ ॥

ष्यते। तत्रैव लयमेतीति न तु चैतन्यात्मनीति। सांख्यमतमपाकर्तुमाह। मत्तो विनिर्गतमिति। इदं विश्वं मत्त एव विनिर्गतं मय्येव लयमे
ष्यति प्राप्स्यति। यथा मृदादौ कुंभादिस्तद्वदित्यर्थः। न चात्र प्रमाणाभाव इति शंकनीयं। यतो वा इमानि भूतानि जायंते येन जातानि
जीवंति यत्प्रयंत्यभिसंविशंतीति श्रुतेः॥१०॥ ॥ननु ब्रह्मत्वे जगदुपादानकारणं तस्य तर्हि विकारित्वात् मृदादिवद्विनाशित्वापत्ति
रित्याशंक्याह। अहो इति। अहो आश्चर्यरूपो हं यस्य मम सर्वोपादानत्वस्वीकारात्। अत एव शेषकार्योपादानत्वादविनाशिने स
र्वोत्कृष्टाय मह्यं नमः। ब्रह्मादिदेवतावत् प्रलये विनाशशंकां निराकरोति। ब्रह्मादीति। ब्रह्मादिस्तंबपर्यंतं यत् जगत् तस्य नाशेऽपि ॥५॥
तिष्ठतः प्रलयेपि स्थितिमतो यस्य मे नाशो नास्तीत्यर्थः। सत्यं ज्ञानमनंतं ब्रह्मेति श्रुतेः॥११॥ ॥श्रीगुरवे नमः॥ श्री॥ श्री॥ श्री॥

नन्वात्मा सुखदुःखावच्छेदकदेहत्वान्नाना तथाहंकाररूपत्वान्न तत्रेदृग्गमनागमनवानित्याशंक्याह। अहो अहमिति। अहो आ
श्चर्यरूपोहं। आश्चर्यरूपायमह्यं नमः। आश्चर्यरूपत्वमेवाह। एकोहमिति। नानासुखदुःखावच्छेदकदेहवानप्यहमेक एव। यथा
नानासकंपनिःकंपत्वावच्छेदकजलोपाधिवानपि भानुरेक एवेत्यर्थः। क्वचिदिति। क्वचिद्व्याप्यस्थितः परिछिन्नाहंकारविलक्षणो
हं क्वचिदपि न गंतागतवानित्यर्थः॥१२॥ ॥नन्वात्मनि निःसंगे शरीरसंसर्गितया जगद्धारकत्वादित्याशंक्याह। अहो अहमिति। प्रथम
पादार्थः पूर्ववत्। इतिकारणात् मम त्वत्समो दक्षः असंभाव्यकार्यविधानचतुरः कोपि नास्ति येन हेतुना शरीरेणाऽसंस्पृश्यपि
लापितेनोल्मुकवत् असंबध्येव। चिरं बहुकालं विश्वं स्थावरजंगमं मया धृतं॥१३॥ ॥नन्वसंबंधस्य न जगद्धारकत्वं संबं

अहो अहं नमो मह्यमेकोहं देहवानपि॥ क्वचिन्न गंता नागंता व्याप्य विश्वमवस्थितः॥१२॥ ॥अहो अहं नमो मह्यं
दक्षो नास्तीति मत्समः॥ असंस्पृश्य शरीरेण येन विश्वं चिरं धृतं॥१३॥ अहो अहं नमो मह्यं यस्य मे नास्ति किंचन॥
अथवा यस्य मे सर्वं यद्वाङ्मनसगोचरं॥१४॥ ॥ज्ञानं ज्ञेयं तथा ज्ञाता त्रितयं नास्ति वास्तवं॥ अज्ञानाद्भाति
यत्रेदं सोहमस्मि निरंजनः॥१५॥ ॥

ध्येव मिथ्यादेहगेहादिधारकत्वादित्याशंक्याह। अहो अहमिति। अहो आश्चर्यरूपो हं तस्मै मे नमः। यस्य मे संबंधि परमार्थ
गत्या किंचन किमपि नास्ति। परमार्थतः सतो द्वितीयस्याभावात्। अथवा यत् वाङ्मनसगोचरं तावत्सर्वं यस्य मे मम संबंधि
मिथ्यातादात्म्यसंबंधि सुवर्णकुंडलादिवदित्यर्थः। अत एव सर्वसंबंधित्वात् यावत् सर्वसंबंधित्वाभ्यामाश्चर्यरूपाय म
ह्यं नम इत्यर्थः॥१४॥ ननु त्रिपुटीरूपसंसारस्य पारमार्थिकत्वात् कथं मिथ्यातादात्म्यसंबंधो जगदात्मनोरित्याशंक्याह। ज्ञानं ज्ञे
यमिति। ज्ञानं ज्ञेयं तथा ज्ञाता इत्यादिके त्रितयं त्रिपुटीरूपसंसारं वास्तवं पारमार्थिकं नास्ति। यत्र मयि इदं त्रितयं अज्ञानाद्नि
र्वचनीयात् ज्ञानान्मिथ्यातादात्म्येनाध्यस्तं भाति अत एव वस्तुगत्याहं निरंजनः प्रपंचमलसंबंधशून्योस्मीत्यर्थः॥१५॥ ॥

ननु निरंजनस्य कथं दुःखसंबंध इत्याशंक्याह द्वैतभ्रांतिमूलक एवासौ न तु वास्तव इत्याह। द्वैतमूलमिति। अ-
हो आश्चर्ये निरंजनस्याप्यात्मनः द्वैतमूलं दुःखं द्वैतमात्रमोक्षे दुःखाध्यासो ननु वास्तवं दुःखमित्यर्थः। दुः-
खाध्यासमहाव्याधेः किं भेषजमित्याशंक्याह। नान्यदिति। अमलो मायातत्कार्याणि तद्रहितश्चिन्मात्रस्वरूप एकोहं
एतत्प्रतीयमानं सर्वं दृश्यं जडजातं मृषा मिथ्या न पारमार्थिकमिति बोधादन्यत् तस्य दुःखव्याधेर्भेषजं नास्तीत्य-
र्थः॥१६॥ ननु चायं द्वैतप्रपंचाध्यासः किंनिमित्तः किमुपादानक इत्याशंक्याह। बोधेति। बोधमात्रश्चिद्रस-
रूपोहमेव पारमार्थिकः। मायासर्वोपादानभूतेन कर्त्राज्ञानाद् दुःखं अज्ञानरूपनिमित्तादहंकारप्रमुख उपाधि-

मू   द्वैतमूलमहो दुःखं नान्यत्तस्यास्ति भेषजं। दृश्यमेतन्मृषा सर्वमेकोहं चिद्रसोमलः॥१६॥ बोधमात्रोह-
मज्ञानादुपाधिः कल्पितो मया॥ एवं विमृशतो नित्यं निर्विकल्पे स्थितिर्मम॥१७॥ अहो मयि स्थितं वि-
न   श्वं वस्तुतो न मयि स्थितं न मे बंधोस्ति मोक्षो वा भ्रांतिः शांता निराश्रया॥१८॥ सशरीरमिदं विश्वं न किंचि-
दिति निश्चितं॥ शुद्धचिन्मात्र आत्मा च तत्कस्मिन्कल्पनाधुना॥१९॥ ॥द्वैतप्रपंचः कल्पितः। एवं विचारस्य फलमाह

एवमिति। एवं नित्यं विमृशतो विचारयतो मम निर्विकल्पे निरस्तद्वैते स्वरूपचैतन्ये स्थितिः प्राप्तिर्जाता॥१७॥ ननु स्वरूपचैतन्यप्रा-
प्तिरूपा मुक्तिः प्राप्ता किं विचारजन्या चेत्तर्हि मुक्तेर्विनाशापत्तिः जन्यभावस्य विनाशित्वनियमात् विचाराजन्या चेत्तर्हि विचाररहितानां
मपि मोक्षापात इत्याशंक्याह। अहो इति। वस्तुतो मम बंधो नास्ति न च मोक्षोप्यस्ति नित्यचिद्रूपत्वात् तर्हि शास्त्रविचारस्य किं फल-
मित्याशंक्य भ्रांतिनिवृत्तिरेव तत्फलमित्याह। अहो मयीति। अहो आश्चर्यं मयि स्थितमपि विश्वं वस्तुतः कालत्रयेपि मयि ना-
स्थितमिति विचारतो भ्रांतिरेव शांता ननु परमानंदावाप्तिर्जनिता। आत्मनः सर्वदा परमानंदरूपत्वात् कीदृशी भ्रांतिः निराश्रया
के विचाराद् ज्ञानस्य नष्टत्वान्निर्मूलेत्यर्थः॥१८॥ ॥ननु अधिष्ठानस्योपादानस्य सत्त्वात् मुक्तेपि प्रपंचोदयः स्यादित्याशंक्याह

॥६॥

ननु सर्वस्य प्रपंचस्य अवास्तवत्वे वर्णजात्याश्रय शरीरमप्यवास्तवमिति। शरीरादिविशेषणाधिकृत्य प्रवर्तमानं विधिनिषेधशास्त्रमप्य
त्वा वास्तवं स्यात् तथा च तद्बोधितस्वर्गनरकयोरप्यवास्तवत्वं स्वर्गादावनुरागो नरकादिभ्यश्च भयं न स्यात् किं च शास्त्रबोधौ बंधमोक्षा
वपि वास्तवौ न स्यातामित्याशंक्येष्टापत्या परिहरति। शरीरमिति। शरीरादिकमेतत्कल्पनामात्रमेव चिदात्मनः सच्चिदानंदस्वरूपस्य
मम एतैः शरीरादिभिः किमपि कार्यं साध्यं विधिनिषेधादिकं तु अविद्यावर्तमेवाधिकृत्य प्रमाणमित्यर्थः ॥२०॥ ॥स्वर्गादिभिः कि
मे कार्यमिति विप्राणुतेः अथेह लोके नापि मे कार्यं नास्तीत्याह। अहो जनेति। न द्वैतं पश्यतो मम अहो इत्याश्चर्ये जनसमूहेऽपि आरण्य
मिव संवृत्तं संजातं तस्मात् क्व मिथ्यातत्वे क्व रतिं प्रीतिं करवाणि न क्वापीत्यर्थः ॥२१॥ ॥ननु शरीरस्याहं ममतास्पदं तयानुरागविषय
त्वात् अहंकारस्याप्यहंतास्पदतयानुरागविषयत्वात् तत्र स्पृहास्यादित्याशंक्याह। नाहमिति। देहो न जडत्वात् नापि मे देहः मम निर्मम

शरीरं स्वर्गनरकौ बंधमोक्षौ भयं तथा। कल्पनामात्रमेवैतत् किं मे कार्यं चिदात्मनः ॥२०॥ ॥अहो जनसमूहेऽपि न द्वैतं पश्य
तो मम। अरण्यमिव संवृत्तं क्व रतिं करवाण्यहं ॥२१॥ ॥नाहं देहो न मे देहो जीवो नाहमहं हि चित्। अयमेव हि मे बंध आ
सीद्या जीविते स्पृहा ॥२२॥ ॥अहो भुवनकल्लोलैर्विचित्रैर्द्राक् समुत्थितं। मय्यनंतमहांभोधौ चित्तवाते समुद्यते ॥२३॥

त्वात् जीवोऽहंकारो नाहं कर्तृत्वात्। आत्मनश्च अकर्तृत्वात्। कस्तर्हि त्वं मिथ्याशंक्याह। अहं हि चिदिति। चित्स्वरूपमेवाहमित्यर्थः।
कुतस्तर्हि विवेकिनामपि जीवितस्पृहेत्याशंक्याह अयमेव हीति। या जीविते स्पृहा अयमेव बंधः आसीत् जीवनार्थं हि पुमा
न् सुवर्णहरणादि करोतीति जीवेच्छा बंधः बंधहेतुत्वात् इदानीं तु सच्चिदानंदानुभवशालिनो मम मासंगस्य प्राणानुषंगो बंधन
रूपेण जीवितेऽपि स्पृहा नास्तीत्यर्थः ॥२२॥ ॥अथ स्वस्य सर्वाधिष्ठानत्वं पश्यन्नाह। अहो इति। अहो इत्याश्चर्ये अनंतमहां
भोधौ मयि चित्तवाते समुद्यते समुत्पन्ने सति। विचित्रैर्नानाविधैर्भुवनरूपैः कल्लोलैर्द्राक् अत्यर्थं समुदितं उदयो लब्धः।
तथा वारिधेस्तरंगा इव मत्तो भुवनानि वस्तुतो न भिन्नानीत्यर्थः ॥२३॥ ॥श्रीरामाय नमः ॥श्रीकृष्णाय नमः ॥ ॥

प्रारब्धक्षयवशामनुवदति। मयीति। अनन्तमहांभोधौ सर्वव्यापके। चित्समुद्रे मयि चित्तवाते संकल्पविकल्पकंपशालिनि म-
नोमारुते प्रशाम्यति संकल्पादिरहिते सति जीववणिजो जीवात्मलक्षणस्य वाणिज्यकर्तुः अभाग्यात्। प्रारब्धक्षयात्
जगत्पोतः शरीरादिनौकासमूहः विनाशशीलः विनाशवान् भवतीत्यर्थः॥२४॥ ॥अथबाधितानुवृत्त्यास्वस्मिन्सर्व
जीवव्यवहारं पश्यन्नाह। मयीति। आश्चर्यं निःक्रिये निर्विकारे मयि अनन्तमहांभोधौ जीवा एव वीचयस्तरंगाः उद्यंति अ-
भिव्यक्ता भवंति। घ्नंति मिथः परस्परं घ्नंति ताडयंति वा। शत्रुभावाध्यासात् अन्येव भिदः खेलंति च मित्रभावाध्यासात्। अ
विद्याकामकर्मक्षये सति च मयि विशंति लीनाः कस्मात् स्वभावतः अविद्याकामकर्मस्वभाववशात् उत्पत्त्यादिकं प्राप्नुवंति स्वाभावतः व
स्वस्य चिद्रूपस्य अंशरूपेण स्वभावतः तत्रैव प्रविशंति। घटाकाशादयः इव महाकाशे इति विवेकः॥ ॥२५॥ ॥इति विंशतिप्रकरणं॥

मय्यनंतमहांबोधौ चित्तवाते प्रशाम्यति। अभाग्याज्जीववणिजो जगत्पोतो विनश्वरः॥२४॥ ॥मय्यनंतमहांबो
धावाश्चर्यं जीववीचयः। उद्यंति घ्नंति खेलंति प्रविशंति स्वभावतः॥२५॥ ॥इति पंचविंशतिकं समाप्तं॥
अविनाशिनमात्मानमेकं विज्ञाय तत्त्वतः। तवात्मज्ञस्य धीरस्य कथमर्थार्जने रतिः॥१॥ ॥

तत्रायस्मिन्नूत्तानप्रकरणे शिष्येयानुभवस्थितिः। निवेदिता गुरोस्तुष्ट्यै बह्वाश्चर्यपुरःसरा। समाप्ता। शिष्यानुभवपीयूषे
ज्ञातेऽपि करुणावशात्। तद्विज्ञानपरीक्षार्थं शिष्यमाह गुरुः पुनः॥१॥ विज्ञाततत्त्वमपि स्वशिष्यं व्यवहारस्थितं दृष्ट्वा त
द्विज्ञानपरीक्षार्थं तद्व्यवहारस्थितिमाक्षिप्यात्मानुभवशालिनां स्थितिमुपदिशति। अविनाशिनमिति। हे शिष्य अवि
नाशिनं त्रैकालिकसत्ताशालिनं कालतो व्यवच्छेदशून्यं आत्मानं देशतो व्यवच्छेदशून्यं एकं वस्तुतो व्यवच्छेदशून्यं चि
त्स्वरूपं विज्ञाय निदिध्यास्य तत्त्वतः। आत्मज्ञस्य अत एव धीरस्य तव अर्थार्जने व्यवहारिकार्थसंग्रहे कथं रतिः प्रीति
र्लक्ष्यते इत्याक्षेपः॥१॥ ॥७॥

ननु ज्ञाने सति विषयसंग्रहः कथमनुपपन्न इत्याशंक्य विषयप्रीतेरात्माज्ञानमूलत्वं सदृष्टांतं सोपपत्तिकमाह ॥ आत्माज्ञाना
दिति ॥ अहो इति संबोधने हे शिष्य विषयभ्रमगोचरे विषये या प्रीतिः सा आत्माज्ञानादेव भवति ननु ज्ञानादेव भवति ननु ज्ञाना
तद्व्यतिरिक्तविषयाणां बाधादिति भावः अत्र लोकसिद्धं दृष्टांतमाह ॥ शुक्तेरिति ॥ यथा रजतविभ्रमे सति शुक्तेरज्ञानतो लोभः परमा
त्मानमप्यनुभवसाक्षिक इत्यर्थः ॥ विषयभ्रमगोचर इत्यत्र विषयस्यापि पूर्वनिपातो विशेषणविशेष्येण बहुलमित्यत्र बहुलग्रह
णात् ॥ आम्रवृक्षवत् आत्माज्ञानादिति पदं विषयभ्रमगोचर इत्यनेनापि संबध्यते ॥ २ ॥ ॥ अज्ञानमूला विषयप्रीतिरिति प्रागु
क्तं अथ सर्वाधिष्ठानतया आत्मनि ज्ञाते सति विषयेषु न प्रीतिः संभवतीत्याह ॥ विश्वं स्फुरतीति ॥ सागरे तरंगा इव यथा

आत्माज्ञानादहो प्रीतिर्विषयभ्रमगोचरः ॥ शुक्तेरज्ञानतो लोभो यथा रजतविभ्रमे ॥ २ ॥ ॥ विश्वं स्फुरति यत्रेदं तरंगा
इव सागरे ॥ सोहमस्मीति विज्ञाय किं दीन इव धावसि ॥ ३ ॥ ॥ श्रुत्वापि शुद्धचैतन्यमात्मानमतिसुंदरं ॥ उपस्थेत्यं
तसंसक्तो मालिन्यमधिगच्छति ॥ ४ ॥ ॥ सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि ॥ मुनेर्जानत आश्चर्यं ममत्वम
नुवर्तते ॥ ५ ॥ ॥ ॥ व

पृथक् संतारहितास्तद्वत् यत्रेदं विश्वं पृथक् संतारहितं स्फुरति सतत्पदार्थोहमस्मीति विज्ञाय साक्षात्कृत्य दीन इव ममेदं भूर्भुर्लि
तित्वष्णाकुलः इव किं धावसि कथं धावसीत्याक्षेपः ॥ ३ ॥ ॥ तदेव श्लोकत्रयेण ज्ञानिनि निशिष्यदृश्यमानविषयव्यवहारमाक्षिप्येदानीं
सर्वज्ञानिषु विषयव्यवहारं शिष्यपरीक्षार्थं गुरुराक्षिपति ॥ श्रुत्वापीति ॥ शुद्धचैतन्यं श्रुत्वा गुरुमुखाद्वेदांतवाक्यतः साक्षात्कृत्या
पि उपस्थे समीपस्थे विषये अत्यंतसंसक्तः सन् आत्मज्ञः कथं मालिन्यं मोहमगच्छति प्राप्नोति अस्य प्रकरणस्य शिष्याभिज्ञा
सार्थमाक्षेपमुद्रयैव प्रवृत्तत्वात् ॥ यत्राक्षेपवाक्यं रूपं दृश्यते तत्र तथ्याहर्तव्यं ॥ ४ ॥ ॥ पुनरप्याश्चर्यमुद्रयाक्षिपति ॥ सर्वभूतेष्वि
ति ॥ सर्वभूतेषु ब्रह्मादिस्थावरांतेषु आत्मानं अधिष्ठानभूतं जानतः सर्वभूतानि चात्मनि रज्जो भुजगवध्यस्तानि जानतो मुनेर्वि

॥८॥ आस्थितं इति परमं सजातीयविजातीयस्वगतभेदशून्यमद्वैतमास्थितः साक्षादनुभवतस्य। मोक्षस्वरूपोर्थः सच्चिदानंदा
त्मा तत्र व्यवस्थितस्तदेकस्तदेकप्रवणोपि कामवशगः सन् केलिशिक्षया नानाक्रीडाभ्यासेन विकलो दृश्यत इत्या
श्चर्यं॥६॥ ॥उद्भूतमिति। उद्भूतं कामं ज्ञानदुर्मित्रं ज्ञानस्यात्यंतवैरिणं अवधार्य निश्चित्यापि अतिदुर्बलः अतिसंशयेन ज्ञा
नबलरहितस्त्वज्ञानी कामं विषयमाकांक्षेत्। कामं वांछतीदं आश्चर्यं कीदृशः अंतकालं अनुसमाश्रितः। नाहसमीपवर्तिन्यंतकाले सति
विवेकिनो विषयतृष्णा युक्तेत्यभिप्रायः॥७॥ ॥इहेति। ऐहिकामुष्मिकभोगविरक्तस्य नित्यमात्मतत्वं अनित्यं शरीरादिकं तद्विवेकिनो
मोक्षसच्चिदानंदस्तत्र कामोंतःकरणं यस्य एवंविधस्य ज्ञानिनोपि मोक्षादेव असद्रूपतनुधनवियोगादेव विभीषिका भयं दृश्यते। नहि

आस्थितः परमाद्वैतं मोक्षार्थेपि व्यवस्थितः॥आश्चर्यं कामवशगो विकलः केलिशिक्षया॥६॥ ॥उद्भूतं ज्ञानदुर्मित्रमवधार्या
तिदुर्बलः॥आश्चर्यं काममाकांक्षेत्कालमंतमनुश्रितः॥७॥ इहामुत्र विरक्तस्य नित्यानित्यविवेकिनः॥आश्चर्यं मोक्षका
मस्य मोक्षादेव विभीषिका॥८॥ ॥धीरस्तु भोज्यमानोपि पीड्यमानोपि सर्वदा॥आत्मानं केवलं पश्यन्न तुष्यति न
कुप्यति॥९॥ ॥चेष्टमानं शरीरं स्वं पश्यत्यन्यशरीरवत्॥संस्तवे चापि निंदायां कथं क्षुभ्येन्महाशयः॥१०॥ ॥ ॥

स्वप्नदृष्टतनुधननाशोपि जाग्रतो भयकृत्क्वापि दृष्टमिति भावः॥८॥ ॥एवमाक्षेपमुद्रया पूर्वमुक्त्वा अथ ज्ञानिनस्तोषरोषावनुत्पि
त्ताविति कैमुतो निरूपयति॥धीर इति। धीरो ज्ञानी लोकैर्विषयान् भोज्यमानोपि तथा निंदादिना पीड्यमानोपि सर्वदा आत्मानं के
व वलं सुखदुःखभोगादिरहितं पश्यन् न तुष्यति। न कुप्यति। तोषरोषहेतूनां केवलात्मन्यसत्त्वज्ञानादित्यर्थः॥९॥ ॥किं च तोष
रोषहेतुर्नास्तुतिनिंदादीनां शरीरधर्मत्वाच्छरीरस्य चात्मभिन्नत्वेनानुसंधानात्कथं ज्ञानिनस्तोषरोषावित्याह। चेष्टमानमि
ति। स्वशरीरं स्वात्मभिन्नं चेष्टाश्रयत्वादन्यशरीरवत् इति यः पश्यति स महाशयः संस्तवे स्तुतौ अपि निंदायां कथं क्षुभ्येत् कथं रोष ॥८॥
तोषरूपां विक्रियां व्रजेत् इत्याक्षेपः॥१०॥

मार्यमारकयोरसत्यत्वानुसंधानात्संनिहितेपिमृत्यौज्ञानिनस्त्रासः कथमित्याह। मायामात्रमिति। इदंदृश्यमानंविश्वंमार्यमारकादि
रूपंसमग्रमपिमायामात्रमसत्यरूपंपश्यन्नतएवकुतइदंश्वराराद्रिकं जायते। कुत्रचाविलयंयात्येवंरूपकौतुकरहितस्तथापिधीरधीः धी
रस्वस्वरूपास्खलाधीर्यस्यसः। सन्निहितेमृत्यौसत्यपिकथंत्रस्यतीत्याक्षेपः॥११॥ ॥सर्वेषामाक्षेपाणांसमर्थनार्थंज्ञानिनोनिरूप
त्वमाह। निस्पृहमिति। यस्यनैराश्येमोक्षेपिमानसंनिस्पृहंतस्यआत्मज्ञानतृप्तस्यब्रह्मैवाहमस्मीतिज्ञानतः। समाप्तसर्वमनोरथस्य
केनसमंतुलनाजायतेनकेनापीत्यर्थः॥१२॥ ॥हानोपानादिव्यवहारमाक्षिपति। स्वभावादिति। प्रपंचोमिथ्यादृश्यत्वाच्छुक्तिकारजतवदि
त्यनुमानात्तेदृतदृश्यंनकिंचननसत्नाप्यसदितिजानानोनिश्चिन्वन्योधीरधीःसइदंग्राह्यमिदंत्याज्यमितिकथंपश्यतीत्याक्षेपः॥१३॥
मायामात्रमिदंविश्वंपश्यन्विगतकौतुकः। अपिसन्निहितेमृत्यौकथंत्रस्यतिधीरधीः॥११॥ ॥निस्पृहंमानसंयस्यनैराश्ये
पिमहात्मनः। तस्यात्मज्ञानतृप्तस्यतुलनाकेनजायते॥१२॥ ॥स्वभावादेवजानानोदृश्यमेतन्नकिंचन। इदंग्राह्यमिदंत्या
ज्यंसकिंपश्यतिधीरधीः॥१३॥ ॥अंतस्त्यक्तकषायस्यनिर्द्वंद्वस्यनिराशिषः। यदृच्छयागतोभोगोनदुःखायनतुष्टये॥
॥१४॥ ॥७॥ छ॥ कृतात्मज्ञस्यधीरस्यखेलतोभोगलीलया॥ नहिसंसारवाहीकैःमूढैःसहसमानता॥१॥ ॥श्रीराम॥ ॥
अत्रहेतुमाह। अंतस्त्यक्तेति। अंतःकरणात्त्यक्ताःकषायाविषयवासनायेन तस्यनिर्द्वंद्वस्यशीतोष्णादिसमचित्तस्यअतएवनिराशिषः
विषयवांछनाविहीनस्ययदृच्छयादैवयोगात्आगतःप्राप्तोभोगोभुज्यमानोपिविषयोदुःखायनभवतितुष्टयेचनभवति॥१४॥ ॥इति॥
॥इतितृतीयप्रकरणं॥ ॥गुरुणैवमुपाक्षिप्तःशिष्योज्ञानदृशोल्लसत्॥ ज्ञानिन्यदोषवैष्टानस्पष्टमावष्टसंभवं॥१॥ ॥एवंतावद्गुरुणापरीक्षार्थमा
क्षिप्तःशिष्यःप्रारब्धवशाद्बाधितानुवृत्त्याज्ञानिन्यपिसर्वव्यवहाराणामुपपत्तिमात्मज्ञानोल्लसद्वशाद्देवाहपंचभिःश्लोकैः॥कृतेत्यात्मज्ञानो
ल्लसितहर्षेहगुरोआत्मज्ञस्यसर्वाधिष्ठानतत्पारब्धात्मानंज्ञानतःअतएवधीरस्यविषयैरविक्षिप्तचित्तस्यभोगलीलयाविषयभो
गादिरूपलीलयाक्रीडयाप्रारब्धवशात्प्रवृत्तयाखेलतःक्रीडतःसंस्कारवाहकैःसंसारवृत्तिपरायणैर्मूढैर्देहाद्यात्मवादिभिःसहन
हिसमानतानैवतुल्यत्वं। तदुक्तंभगवता। तत्त्ववित्तुमहाबाहोगुणकर्मविभागयोः। गुणागुणेषुवर्त्तंतइतिमत्वानसज्जते॥१॥ ॥

अ॰टी॰

॥९॥ ननु संसारव्यवहारस्थो ज्ञानी कथं संसारतुल्यतृप्त्या शक्यहर्षादिरहितत्वात्तस्य वैलक्षण्यमाह। यत्पदेति अहोइति सं बोधने हे गुरो यदाप्य
हो आश्चर्यं शक्राद्याः सर्वदेवता अपि यत्पदप्रेप्सवः यत्पदप्राप्तिभिच्छन्तो दीनास्तत्प्राप्तिं तं शोच्याः वर्तते। तत्र सच्चिदानंदाख्ये पदे स्थिते सति
स्तत्पदार्थैक्येन वर्तमानोपि योगी लब्धसाक्षात्कारो विषयलाभान्न हर्षं प्राप्नोति नापि तदपगमात् दुःखं च क्षोभवतीत्यर्थः॥२॥ ॥ तत्वज्ञस्य
विध्यकिंकरत्वं वक्तुं पुण्याद्यसंस्पर्शमाह। तदज्ञस्येति। तत्त्वपदार्थैक्याभिज्ञस्य पुण्यपापाभ्यां सह अंतःकरणधर्माणां स्पर्शः संबंधो न जाय
ते। ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते अर्जुनेति स्मृतेः अत्र दृष्टांतमाह। नहीति। यथा हि। आकाशस्य धूमेन सह संगतिर्नास्ति। तथा त्म
स्य न पुण्यादिसंगतिरित्यर्थः॥३॥ ॥ ननु कर्मणि कृते कथं न पुण्यादिस्पर्शः इत्याशंक्य ज्ञानिनो विधिनिषेधानियम्यत्वमाह। आत्मैवे
ति। येन महात्मना इदं दृश्यमानं सर्वं जगत् आत्मैवेति ज्ञातं तं ज्ञानिनं यदृच्छया प्रारब्धवशाद् वर्तमानं को वक्तुं कलापो निषेद्धुं प्रवर्त

यत्पदं प्रेप्सवो दीनाः शक्राद्याः सर्वदेवताः। अहो तत्र स्थितो योगी न हर्षमुपगच्छति॥२॥ ॥तज्ज्ञ स्य पुण्यपापाभ्यां स्पर्शो ह्यं स्व
तर्न जायते। न ह्याकाशस्य धूमेन दृश्यमानापि संगतिः॥३॥ ॥आत्मैवेदं जगत्सर्वं ज्ञातं येन महात्मना। यदृच्छया वर्तमानं तं
निषेद्धुं क्षमेत कः॥४॥ ॥आब्रह्मस्तंबपर्यंते भूतग्रामे चतुर्विधे॥ विज्ञस्यैव हि सामर्थ्यमिच्छानिच्छाविवर्जने॥५॥ ॥आत्मानमद्वयं कश्चिज्जानाति जगदीश्वरं॥ यद्वेत्ति तत्स कुरुते न भयं तस्य कुत्रचित्॥६॥ ॥इति उल्लासषट्कं॥ ॥७॥ ॥
पितुं क्षमः समर्थः न कोपीत्यर्थः। तदुक्तं शारीरभाष्ये अविद्यावद्विषयो वेद इति। प्रबोधनी एवासौ सुप्तो राजेव बाधितश्रितिरिति स्मृतिरपि॥
॥४॥ ॥ ननु ज्ञानिनोपि न यदृच्छया प्रवर्तते किं त्विच्छयैव तदिच्छानिच्छयो निवर्तयितुं अशक्यत्वादित्याशंक्याह। आब्रह्मेति। यद्यपि ब्रह्मणमार
भ्य स्तंबपर्यंते रिच्छानिच्छे विवर्तयितुमशक्ये तथापि विज्ञस्यैवेच्छाद्वेषनिवर्तने सामर्थ्यं सामर्थ्यमतो यदृच्छया प्रवर्तमानो ज्ञानी न विधि
नियम्य इत्यर्थः॥५॥ ॥ अद्वैतज्ञानेन द्वितीयस्य बाधितत्वात् ज्ञानिनो भयहेतुः कोपि नास्तीत्युपसंहरति। आत्मानमिति। आत्मानमद्वयं कश्चि
२ ज्जानाति जगदीश्वरमिति। कश्चित्सहस्रेषु एक एव जगदीश्वरं तत्पदार्थमात्मानं त्वंपदार्थं अद्वयं अभिन्नं जानाति। स यद्वेत्ति प्रारब्धवशाद् बुद्धि ॥९॥
तानुवृत्या इदं कर्तव्यमिति मन्यते तत्करोति। एवं कुर्वतस्तस्य कुत्रचित् इह वा अमुत्र वा भयं नास्ति। भयहेतोर्द्वैतस्य ज्ञानबाधितत्वादिति भावः॥६॥

एवमुल्लासषट्केन शिष्यः परीक्षिते सति। गुरुरिदं पदं शास्त्रार्थं लययोगमथाब्रवीत्॥ इति उल्लासषट्कविवरणं॥

अष्टा॰टी

॥१०॥

स्कृ

घटाकाशदृष्टांतेदेहात्मनोर्भेदंउक्त्वाकाशस्यादित्यपरितोषादाह महोदधिरिति स्पष्टं॥२॥ ॥समुद्रवीचिदृष्टांतेदेहात्मनोर्विकारित्वंउक्त्वा
स्यादित्यपरितोषादाह अहंसइति स्पष्टं॥३॥ ॥शुक्तिदृष्टांतेप्यात्मनिपरिछिन्नत्वशंकास्यात्तद्व्यावृत्त्यर्थमाह अहंवाअह
मेवसर्वभूतेषुप्रकृतिप्राकृतिकेषुसत्तास्फूर्त्यादिप्रदत्वेनास्मिअतोहेतोःसर्वभूतान्यधिष्ठानभूतेमयिवर्ततइतिज्ञानेवेदांतसिद्धं
तथापिसत्यतस्यात्मनस्त्यागादिकंनसंभवतीत्यर्थः॥४॥ ॥इत्युपदेशःसमाप्तः॥ ॥लययोगेनानुष्ठानेप्यहंवैरंनिरंकुशं॥अत्राक्य
शिष्यःसोल्लासादब्रवीद्गुरुमुत्तरं॥१॥ ॥ननुलययोगाभावेसंसारविक्षेपोनिरंकुशःप्रसारस्यादित्यात्राक्य॥तस्यानिष्टत्वाभावं
अनुभवपरंकेनोत्तरमाह॥शिष्यःमयीति॥मय्यात्मनिअनंतेमहासमुद्रेविश्वरूपःपोतःनौकास्वांतवातेन मनःपवनेन
इतस्ततोभ्रमति॥अत्रसमअसहिष्णुता असहनंनास्तिसमुद्रस्यवनौकापरिभ्रमणादित्यर्थः॥१॥ ॥जगद्व्यवहारस्यानि
महोदधिरिवाहंसप्रपंचोवीचिसंनिभः॥इतिज्ञानंतथैतस्यनत्यागोनग्रहोलयः॥२॥ ॥अहंसशुक्तिसंकाशोरू
प्यवद्विश्वकल्पना॥इतिज्ञानंतथैतस्यनत्यागोनग्रहोलयः॥३॥ ॥अहंवासर्वभूतेषुसर्वभूतान्यथोमयि॥इति
ज्ञानंतथैतस्यनत्यागोनग्रहोलयः॥४॥ ॥अहोचिन्मात्रमेवाहमिंद्रजालोपमंजगत्॥अतोममकथंकुत्रहेयोपादेयकल्पना॥५॥
इत्वाभावःपूर्वमुक्तःअथजगद्ग्रहत्यागयोरपिनानिष्टत्वमाह॥मयीति॥मयिआत्मनिअनंतेविनाशरहितेमहतिव्यापकेअंभोधौसमुद्रेअ
गच्छत्वायावीचिस्वभावतःइत्यत्वादिस्वभावाद्धेतुःअपरमस्तमायानुममतुतदुदयवृद्धिर्नाशिव्यापकत्वात्तरंगमेवसंगतिनी
स्तिअनंतत्वादित्यर्थः॥२॥ ॥पूर्वदृष्टांतेस्वात्मनोजगदाकारइतिभ्रमस्यात्तन्निवारणार्थमाहमयीति॥मय्यनंतमहांभोधौनामम
सि[illegible]विश्वकल्पनाभ्रममात्रमेवनतुतात्विकंअंतःकरणादहमितिशांतःप्रपंचपवनरहितेअत्रहेतुमाहनिराकारइति॥
एतदात्मानमेवअहमास्थितःआश्रितः॥ननुलययोगतस्यपूर्वमेवदूषितत्वात्अतिवादितत्वंस्पष्टयति॥नात्मेतिआत्माभावे
पुदेहादिसुआश्रयतयानास्तिव्यापकत्वात्भावोदेहादिस्तत्रात्मनिनास्तिनिरंजनत्वात्इतिकारणादहंअसक्तःसंसर्गरहितोनए
वास्पृहःइच्छादिधर्मासंस्थितःशांतइत्यर्थः॥४॥ ॥इच्छादिरहितत्वेहेतुमत्याहअहोइति॥अहोइत्याश्चर्यरूपमेवोक्तिकिंचिन्मात्र

॥२०॥

इत्थंपरीक्षितज्ञानंशिष्यंमत्वाभिनंदितुंगुरुर्बंधस्यमोक्षस्यव्यवस्थांसम्यगब्रवीत्॥ ॥तदेवमुपरिप्रकरणेःसंशिष्यंसम्यक्परीक्ष्यबं
धमोक्षव्यवस्थानिरूपणव्याजेनगुरुःस्वशिष्यानुभवमभिनंदति॥चतुर्भिःश्लोकैःतदेति॥हेशिष्यअतोममकथंकुत्रहेयोपादेयकल्पनेत्य
नयन्वयोक्तंतथैवयदाचित्तंपदार्थवांछादिविकारवद्भवतितदेवजीवस्यबंधइत्यर्थः॥१॥ ॥तदामुक्तिरिति॥यदाचित्तंवांछादिविकल्पानतितदा
मुक्तिरित्यर्थः॥तदेवपृथक्बंधमोक्षावुक्तौअथसमुच्चयेनबंधमोक्षावाह॥तदाबंधइति॥यदाचित्तंकास्वप्यन्यासुदृष्टिषुसंसक्तंतदाबंधःय
दाचित्तंसर्वास्वप्यनासक्तंदृष्टिषुसक्तंतदामोक्षइत्यर्थः॥३॥ ॥अस्तुबाधितानुवृत्त्यादग्धपटोपमानास्वपिविषयदृष्टिषुतथाप्यहंकार
निवृत्तौमोक्षस्तदनुवृत्तौबंधइतिवदन्शिष्योक्तमर्थमभिनंदितुमनुवदति॥यदानाहमिति॥यदाहमित्येवंरूपप्रथमोध्यासोनर्थमूल
इतानिवर्ततेतदामोक्षःयदावसोनुवर्ततेतदाबंधनमितिनिश्चित्वाहेलयानायासेनैवहानोपानादिक्रियाणामकर्तात्मसिअकर्तात्मज्ञा
तदाबंधोयदाचित्तंकिंचिद्वांछतिशोचति॥किंचिन्मुंचतिगृह्णातिकिंचिद्धृष्यतिकुप्यति॥१॥ ॥तदामुक्तिर्यदाचित्तंनवांछतिन
शोचति॥नमुंचतिनगृह्णातिनहृष्यतिनकुप्यति॥२॥ ॥तदाबंधोयदाचित्तंसक्तंकास्वपिदृष्टिषु॥तदामोक्षोयदाचित्तमस
क्तंसर्वदृष्टिषु॥३॥ ॥यदानाहंतदामोक्षोयदाहंबंधनंतदा॥मत्वेतिहेलयाकिंचिन्मागृहाणविमुंचमा॥४॥ ॥इतिमोक्षस्वरूपकरणं॥
कृताकृतेचद्वंद्वानिकदाशांतानिकस्यवा॥एवंज्ञात्वेहनिर्वेदाद्भवत्यागपरोव्रती॥१॥ ॥कस्यापितातधन्यस्यलोकचेष्टावलोकनात्॥
तेनकर्तृत्वाभिमानोछेदइतिभावः॥४॥ ॥इतिबंधमोक्षव्यवस्थाप्रकरणं॥ जीवितेच्छाबुभुक्षाचबुभुत्सोपशमंगता॥२॥ ॥श्रीराम॥ ॥
शासिरइछादित्यज्जनात्मकः॥१॥ ॥शिष्योनुभवस्यैवदार्ढ्यार्थंगुरुणोच्यते॥निर्वेदसम्भवःसम
माह॥कृतेति॥कृताकृतेइदंकर्तव्यमिदमकर्तव्यमित्यपिविवेकाद्द्वंद्वानिसुखदुःखादीनिकस्यकदावाशांतानिअपितुनकस्यापिनकदा
पिशांतानिएवंज्ञात्वाइहकृताकृतादिषुनिर्वेदात्अभिनिवेशाभावात्परित्यागादेवत्यागपरोभव॥कीदृशस्त्वंअव्रती॥नास्तिव्रतंकुत्राप्याग्रहोयस्य
सः॥१॥ ॥विनधर्मत्यागरूपोनिर्वेदस्तुकस्यचिदेवस्यान्नतुसर्वस्येत्याह॥कस्यापीति॥हेतातशिष्यसहस्रेषुमध्येकस्यचिदेवधन्यस्योत्पत्ति
विनाशरूपावेष्टावलोकनात्जीवितेच्छाभोगेच्छाज्ञानेच्छाइत्यपशमंगताइदंतुनाहृष्टानिर्वेदःसंपन्नःशिष्यमभिनंदितुमेवोच्यतेनतूप
देशयतइतिप्रागुक्तमेव॥२॥ ॥श्रीराम॥

अ.टी.

केचिद्धोमेपराः केचिज्जपपराः केचित्कृच्छ्रचांद्रायणादिपराइतिनानाविधं॥२

॥२२॥ ननुज्ञानिनोसर्वत्रेछोपशमःकिंहेतुकइत्यतआह। अनित्यमिति। इदंदृश्यमानंसर्वप्रपंचजातंअनित्यंचैतन्यध्वस्तंतथापृथक्सत्वेनतृष्णा
कालंसं। आध्यात्मिकाधिदैविकाधिभौतिकतापत्रितयदूषितंअतएवअसारंतुच्छंअतएवहेयंपृथक्सत्तयानैवादरणीयमितिनिश्चि
त्यज्ञानीशाम्यति। कुत्रापिइच्छांनकुरुते॥३॥ द्वंद्वानामारब्धकर्मवशादवश्यंभावित्वात्तत्रेछानिछेविहाययथाप्राप्तभोगीमुक्तिमाप्नुयादि
त्याह। कोसाविति। यत्रनृणांद्वंद्वानिसुखदुःखादीनिनसंतिअसौकःकालःकावाबाल्यादिवयोलक्षणशरीरावस्थाअपितुनकोपि
तानितादृशानिद्वंद्वान्युपेक्ष्यतत्रेछामनिछामकृत्वायथाप्राप्तेषुअनासक्तःतथावर्तीसिद्धिंमुक्तिंआप्नुयादित्यर्थः॥४॥ ॥तर्कशा वा
स्त्रादिज्ञानेषुनिष्ठानंकर्तव्यंनानाविप्रतिपत्तियुक्तत्वान्नापिकर्मसुनापिअष्टांगयोगादिष्वित्याहनानामतमिति। महर्षी
णांगौतमजैमिनिप्रभृतीनांमतंनानाविधंअपरिछिन्नंदृष्ट्वा। तर्कशास्त्रादिभ्योनिर्वेदमापन्नस्तथासाधूनांकर्मनिष्ठानांमतंनानावि

अनित्यंसर्वमेवेदंतापत्रितयदूषितं। असारंनिंदितंहेयमितिनिश्चित्यशाम्यति॥३॥ ॥कोसौकालोवयःकिंवायत्रद्वंद्वानि
नोनृणां। तान्युपेक्ष्ययथाप्राप्तवर्तीसिद्धिमवाप्नुयात्॥४॥ ॥नानामतंमहर्षीणांसाधूनांयोगिनांतथा। दृष्ट्वानि
र्वेदमापन्नःकोनशाम्यतिमानवः॥५॥ ॥कृत्वामूर्तिपरिज्ञानंचैतन्यस्यनकिंगुरुः॥ निर्वेदसमतायुक्त्यायस्तारयतिसंसृ
तेः॥६॥ पश्यभूतविकारांस्त्वंभूतमात्रान्यथार्थतः। तत्क्षणाद्बंधनिर्मुक्तःस्वरूपस्थोभविष्यसि॥७॥

धंदृष्ट्वाकर्मभ्योपिनिर्वेदमापन्नस्तथायोगिनांमतंनानाविधंकेचिदष्टांगयोगपराःकेचिन्महदादिप्रसंख्यानपराइतिनानावि
धंदृष्ट्वाअष्टांगयोगादिभ्योपिनिर्वेदमापन्नःकेवलमात्मानुसंधाननिष्ठःकोनशाम्यतिकःसुखंनाप्नोतीत्यर्थः॥५॥ ॥
केवलज्ञाननिष्ठामेवाश्रित्यकर्मादिकंमाकुर्वित्याह। कृत्वेति। निर्वेदसमतायुक्त्यानिर्वेदोनामविषयाणामसारतातयाशत्रुमित्रेषुसमता। सर्वत्र
त्मबुद्धिर्युक्तिर्नामयुक्त्यनुग्राहकस्तर्करूपस्तैःचैतन्यस्यसंसारिणोदृश्यस्यमूर्तिपरिज्ञानंस्वरूपसाक्षात्कारंकृत्वातदनंतरंनास्तिकश्चिद्गुरुर्यस्यसं
सारात्सएवंशिष्योयःसंसृतेःसकाशात्आत्मानंतारयति॥६॥ ॥चितनस्वरूपज्ञानोपायमाह। पश्येति। हेशिष्यभूतविकारान्देहेंद्रियादी
न्यथार्थतस्त्वंभूतमात्रान्पश्यननुआत्मस्वरूपान्एवंसतित्वंतत्क्षणाद्बंधनिर्मुक्तःशरीराद्यभावनिर्मुक्तःसन्शरीरादिविवेका ॥२२॥
त्स्वरूपस्थोभविष्यसिशरीरादावनात्मतयाज्ञातेसतितत्साक्षिभूतआत्माअवशिष्यतेइतिभावः॥७॥ श्रीराम॥

एवमुक्त्वासपष्ठेनशिष्यंपरिक्षितेसनिपुर्नदृष्टोपदेशार्थंआचार्योलयमुपदिशतिनतेसंगोस्तीत्यादिचतुष्टयेननतइतिहेशिष्यशुद्धबुद्ध
स्वभावस्यतवकेनापिदेहगेहादिनाहंकारममकारास्पदेननसंगोस्तिअतःशुद्धबुद्धःअसंगस्त्वंकिंत्यक्तुंकिमुपादातुंवाइच्छसित
स्मात्संघातस्यदेहस्यविलयंकुर्वन्अहंदेहइतिनिरसनंकुर्वन्नेवमेवदेहादिनिरसनरूपमेवलयंव्रज॥१॥ ॥उदेतीति। हेशिष्यत्व
त्तःसकाशाद्विश्वमुदेतिभवदभिन्नमेवयथावारिधेःसकाशाद्बुद्बुदोवारिधेरभिन्नएवोदेतिएवंप्रकारेणएकंसजातीया
दिभेदरहितमात्मानंज्ञात्वाएवमेवएकात्मज्ञानमेवलयंव्रज॥२॥ ॥ननुप्रत्यक्षतोभिन्नतयाहारसर्पादिभेदेप्रतीयमानेक
थंहारादिलयइत्यतआह। प्रत्यक्षमिति। प्रत्यक्षमपिइदंदृश्यंविश्वममलेत्वयिनास्त्येवअवस्तुत्वात्रज्जुभुजंगवत्तस्मा

नतेसंगोस्तिकेनापिकिंशुद्धस्त्यक्तुमिच्छसि॥ संघातविलयंकुर्वन्नेवमेवलयंव्रज॥१॥ ॥उदेतिभवतोविश्वंवारिधे
रिवबुद्बुदः॥ इतिज्ञात्वैकमात्मानमेवमेवलयंव्रज॥२॥ ॥प्रत्यक्षमप्यवस्तुत्वाद्विश्वंनास्त्यमलेत्वयि॥ रज्जुसर्पइव
व्यक्तमेवमेवलयंव्रज॥३॥ ॥समदुःखसुखःपूर्णआशानैराश्ययोःसमः॥ समजीवितमृत्युःसन्नेवमेवलयंव्र
ज॥४॥ ॥इतिलयचतुष्कं॥ ॥आकाशवदनंतोहंघटवत्प्राकृतंजगत्॥ इतिज्ञानंतथैतस्यनत्यागोनग्रहोलयः॥१॥ ॥

देवमेवलयंव्रज। हेतीयस्यहेयस्योपादेयस्यैवाभावादित्यर्थः॥३॥ ॥समेति। पूर्णआत्मानतुअपूर्णःअतएवद्वैतवशात्भूतयोः
सुखदुःखयोःसमःइच्छानिच्छयोश्चसमस्तथाजीवितमृत्योर्वासमोनिर्विकारःसुखदुःखादीनामनात्मधर्मत्वानुसंधानानु
संधानात्त्वंसुखदुःखादिषुसमब्रह्मदृष्टिरूपंलयंव्रजेत्यर्थः॥४॥ ॥श्रीमद्विश्वेश्वरविरचितायामष्टावक्रटीकायांमाचार्येणो
क्तंलयचतुष्टयंनामपंचमप्रकरणं॥ ॥गुरुणैवंपरीक्षार्थमुपदिष्टेलयेसति॥ पूर्णात्मनोलयाद्यभावंशिष्योसंभवमब्रवीत्॥१॥
रु तदेवंगुरुणात्वत्परीक्षार्थंलययोगेसमुपदिष्टेसतिलयाद्यभावोपपादकस्तत्वज्ञानमनुवदन्नेवशिष्यःपूर्णात्मनोलयाद्यसंभ
वमाहचतुर्भिःश्लोकैः॥ आकाशवदिति। सहनात्मा आकाशवदनंतःनत्वनंतस्यात्मनोदेहादिनिवासःकथमित्यतआह। घटवदिति।
प्राकृतंप्रकृतिकार्यंजगद्देहादिकंघटवत्तथाचात्मनोदेहादिकेदेशावच्छेदकत्वंव्योम्नइवघटादिरित्यर्थः॥ अत्रप्रमाणमाहइतीति॥

अर्जनरक्षणक्षये यत्नेक्लेशो कडुःखसंकुलं ५

नन्वेवमात्मनि ज्ञाते नत्वन्तरेण कथं स्यादित्याशंक्य। वासनात्यागादित्याह वासना इति। वासना विषयवासना एव संसार इति कारणा
त् तावान् नात्वं मुंच वासनात्यागः वात्मनिष्ठा यासत्यात तस्य त्याग इत्यर्थः। अथ अधुना वासनात्यागे सति स्थितिर्यथा तथा यथा प्रारब्धं
नयेत्यर्थः॥८॥ ॥इति निर्वेदाष्टकं॥ ॥विषयाणामभावेऽपि तुष्टिर्निर्वेद इत्युक्तः। न केवलमर्थं च विषयेष्वेव तृष्णां त्याजयितुं दशकेन॥१॥
विषये विनापि संतोषरूपो निर्वेदः प्रागुक्तः अथेदानीं विषयतृष्णोपशमम् अभिनंदनमुद्दिश्य गुरुरुदाहरति॥ विहायेति। कामं वैरिणं ज्ञा
नशत्रुं विहाय तथा अनर्थसंकुलं अर्थं विहाय तथा एतयोः कामार्थयोर्हेतुं धर्ममपि विहाय सर्वत्र त्रिवर्गहेतुकर्मसु अनादरं उपेक्षां कुरु॥१॥ ॥
ननु मित्रक्षेत्रादिफलकेषु कर्मसु कथं अनादर इत्याशंक्य मित्रादीनाम् अनित्यत्वमाह। स्वप्नेन्द्र इति। हे शिष्य मित्रादिसंपदः स्वप्नेन्द्रजालवत् त्रयं य
तो दिनानि त्रीणि पंच वा स्थायिन्य इत्यर्थः॥२॥ ॥सर्वत्रानादरं कुर्वित्यनेनोक्तं वैतृष्ण्यं पुरुषार्थहेतुरित्याह। यत्र यत्रेति। यत्र यत्र येषु येषु प्र

वासना एव संसार इति सर्वा विमुंच ताः। तत्त्यागो वासनात्यागात् स्थितिरद्य यथा तथा॥८॥ ॥इति निर्वेदाष्टकं॥ विहाय वैरिणं काममर्थं चानर्थ
संकुलं॥ धर्ममप्येतयो हेतुं सर्वत्रानादरं कुरु॥१॥ स्वप्नेन्द्रजालवत् पश्य दिनानि त्रीणि पंच वा॥ मित्रक्षेत्रधनागारदारादायादिसंपदः॥२॥
यत्र यत्र भवेत्तृष्णा संसारं विद्धि तं तदा॥ प्रौढवैराग्यमाश्रित्य वीततृष्णः सुखी भव॥३॥ तृष्णामात्रात्मको बंधस्तन्नाशो मोक्ष उच्यते॥ भ
वासंसक्तिमात्रेण प्राप्तितुष्टिर्मुहुर्मुहुः॥४॥ त्वमेकश्चेतनः शुद्धो जडं विश्वमसत्तथा॥ अविद्यापि न किंचित्सा का बुभुत्सा तथापि ते॥५॥ ॥

यतृष्णा
सक्तेषु विषयेषु तृष्णा भवेत् तमेव संसारं विद्धि। विषयाः कर्मद्वारा संसारहेतुत्वात्। अतः प्रौढवैराग्यप्राप्त्यर्थं प्रीत्यभावमाश्रित्य वीततृष्णः आप्राप्तार्थेच्छारहितः स
न् आत्मनिष्ठः सुखी भवेत्यर्थः॥३॥ अमुमेवार्थं भंग्यंतरेणाह। तृष्णामात्रेति। तृष्णामात्रस्वरूप एव बंधः। कर्मद्वारा बंधहेतुत्वात् तन्नाशो मो
क्ष इत्यत्र हेतुमाह भवेति। भवतीति भवो देहादिर्विषयस्तत्र संगाभावमात्रेण मुहुर्मुहुर्वारंवारं प्राप्ततुष्टिः आत्मप्राप्तिजः संतोषस्या
त् तत्तृष्णानाश एव मोक्ष इत्यर्थः॥ प्राप्तितुष्टिरिति पाठे प्राप्तिः स्यात् तुष्टिः स्यादित्यर्थः॥४॥ ॥ननु बुभुत्सारूपा तृष्णा कथं त्याज्ये
त्याशंक्याह त्वमेक इति। इह जगति त्रय एव पदार्थाः आत्मा जगत् अविद्या च। तत्र आत्मा तावत् त्वमेवैकश्चेतनः शुद्धो न तु विद्धि
तिस्यात्मानमेवैकं पूर्णं ज्ञात्वा नान्या पुनरात्मबुभुत्सा युक्ता नापि जगद्बुभुत्सा युक्ता जगतः असत्त्वात् जडत्वाच्च नापि

अविद्याच्चिमुक्तोऽज्ञानमस्यापि संशयस्य कारणं यत्त्वातिर्मविव्रजयेत्
तांश्च तत्त्वकृष्णामपि कामुकानामिति ज्ञातव्यम् ॥

नं विनाकस्यापि जायते। इति निश्चितुमेवाहगुरुरत्रनिद

न्दं विश्रममसदित्युक्तं न हि शरद्पति। राज्यमिति। राज्यादीनि सर्वाणि संसक्तस्यापि आसक्तिं कुर्वाणस्यापि तव जन्मनि जन्मनि नाना जन्म
सु नष्टान्यतो विश्रममसदित्यर्थः॥ ६॥ बुभुक्षापि न कर्तव्येति प्रागुक्तं धर्मार्थकामेष्विच्छा न कार्येत्याह। अलमिति। अर्थादिना अलं अर्थ
कामधर्मेषु इच्छा न कार्येत्यर्थः। अत्र हेतुमाह। एभ्य इति। यतः कारणात् संसारकान्तारे संसारलक्षणे वने दुर्गमे वर्त्मनि भ्राम्यतस्तव एभ्यः
अर्थादिभ्यो विश्रान्तिर्भ्रमणविच्छेदो नाभूदतोऽर्थादित्वष्णा न कर्तव्येत्यर्थः॥ ७॥ ॥तृष्णायाउपशाम प्रागुक्तं अथ क्रियामात्रोपशममाह। कृ म
तमिति। हि शिष्य आयासदं प्रयासप्रदं अत एव दुःखं कर्म कायादिना कति जन्मानि न कृतं अपि तु यावदद्य प्राचीनसर्वजन्मनस्त्वया कृ
तं कर्मणा तु त्वया नर्थ एव लब्धस्तत्तस्मादद्यापि अधुना कर्मस्यउपरम्यतां॥ ८॥ ॥इति उपशमाष्टकं प्रकरणं॥ ॥ ॥उक्तार्थानिर्विवि
राज्यं सुताः कलत्राणि शरीराणि सुखानि च॥ संसक्तस्यापि नष्टानि तव जन्मनि जन्मनि॥ ६॥ ॥अलमर्थेन कामेन सुकृतेनापि
कर्मणा॥ एभ्यः संसारकान्तारे न विश्रान्तमभून्मनः॥ ७॥ कृतं न कति जन्मानि कायेन मनसा गिरा॥ दुःखमायासदं कर्म तद
द्याप्युपरम्यतां॥ ८॥ इति उपशमाष्टकं॥ ॥भावाभावविकारश्च स्वभावादिति निश्चयी॥ निर्विकारो गतक्लेशः सुखेनैवोपशाम्य
ति॥ १॥ ईश्वरः सर्वनिर्माता नेहान्य इति निश्चयी। अंतर्गलितसर्वाशः शान्तः क्वापि न सज्जते॥ २॥ ॥आपदः संपदः काले दैवा
देवेति निश्चयी॥ तृप्तः स्वस्थेन्द्रियो नित्यं न वांछति न शोचति॥ ३॥ ॥ ७॥ विनाकस्यापि जायते। इति निश्चितुमेवाहगुरुरत्रनिम
ाष्टकं॥ १॥ उक्तार्थानिर्विज्ञानादेवस्यान्नत्वन्यथेति बोधयितुं ज्ञानाष्टकमाह। तत्रादौ ज्ञानसाधनान्याह। भावाभावेति। भावाभावरू
पो विकारः स्वभावात् मायातत्संस्कारादेव जायते। न तु निर्विकारादात्मन इति निश्चयवान् पुरुषो निश्चयबलात् एवं सुखेनैव अनायासे
न नैव उपशाम्यति॥ १॥ ॥ननु मायाया जडत्वात्तैरेव कथं भावाभावविकार इत्याशंक्याह। ईश्वर इति। ईश्वर एव सर्वनिर्माता नान्य
न्यो भक्तः जीवः ईश्वरपरवशत्वादिति निश्चयी पुरुषो निश्चयबलादेवान्तर्गलितसर्वतृष्णा अत एव शान्तो निश्चलचित्तः सन् क्वापि न स
ज्जते॥ २॥ ॥ननु ईश्वर एव चेत् सर्वनिर्माता तर्हि किंचिदरिद्रान् काँश्चित्तु धनिनः तथा काँश्चित्सुखिनः काँश्चिद्दुःखिनो रचयतः तस्य वैषम्य
नैर्घृण्ये स्यातामित्याशंक्याह। आपद इति। काले समयविशेषे आपदः संपदश्च दैवात् प्राक्तनादृष्टादेव ईश्वरपरिपालितादेवेति निश्चयी अत एव
तृप्तो मीतन्तृष्णाः अत एव नित्यं स्वस्थेन्द्रियो विषयानाकृष्टेन्द्रियः अप्राप्तं न वांछति नष्टं न शोचतीत्यर्थः॥ ३॥ ॥ ॥१२॥

ननु कृतनिश्चयवानपि कर्माणि कुर्वन्नेव दुःखपतत्व इत्याशंक्याह । सुखेति । कर्मफलभुक् सुखं वा दुःखं वा दैवादृष्टो दैवाद् इति निश्चयी । अत एव मया
इदं फलं साध्यमित्यदर्शी अत एव निरायासः श्रमरहितः प्रारब्धवशात् कुर्वन्नपि लिप्यते । कर्मजन्यानर्थभागी न भवति कर्तृत्वाध्यासरहितत्वादित्यर्थः ॥४॥
ननु कुर्वंश्चेत्कथं निरायास इत्याह । चिंतयेति । इह दुःखं चिंतया जायते नान्यथेति निश्चयी अत एव चिंतयाहीनः अत एव शांतः स्थिरांतःकरणः अ
त एव सर्वत्र सुखदुःखवतः साधनेषु गलितस्पृहः पुरुषः सुखी भवतीत्यर्थः ॥५॥ ॥उक्तसाधनैः सिद्धस्य ज्ञानिनो दशां निरूपयति । नाहं देह इति । अहं देहो
न तथा न मे देहः किंतु नित्यबोधोऽहमिति ज्ञानवशात् देहादौ निवृत्ताहंममाभिमानः देहादिना कृतमकृतं च मया कृतमिति न स्मरति । यथा कै
वल्यं विदेहकैवल्यं प्राप्तः कृताकृतं न स्मरति तद्वदित्यर्थः ॥६॥ ॥आब्रह्मेति । ब्रह्माणं हिरण्यगर्भमारभ्य तृणस्तंबपर्यंतं सर्वं जगदहमे
तिप्रत्यक्षनिश्चयवान् पुरुषः निर्विकल्पः संकल्पविकल्पशून्यः अत एव शुचिः विषयासंगरूपमलरहितः अत एव शांतो निश्चयातः

सुखदुःखजन्ममृत्यू दैवादेवेति निश्चयी ॥ साध्यादर्शी निरायासः कुर्वन्नपि न लिप्यते ॥४॥ ॥चिंतया जायते दुःखं नान्यथेहे
ति निश्चयी । तया हीनः सुखी शांतः सर्वत्र गलितस्पृहः ॥५॥ ॥नाहं देहो न मे देहो बोधोऽहमिति निश्चयी ॥ कैवल्यमिव संप्राप्तो
न स्मरत्यकृतं कृतं ॥६॥ ॥आब्रह्मस्तंबपर्यंतमहमेवेति निश्चयी ॥ निर्विकल्पः शुचिः शांतः प्राप्ताप्राप्तविनिर्वृतः ॥७॥ ॥नानाश्चर्य
मिदं विश्वं न किंचिदिति निश्चयी ॥ निर्वासनः स्फूर्तिमात्रो न किंचिदिव शाम्यति ॥८॥ ॥इति ज्ञानाष्टकं समाप्तं ॥ ॥कायकृ
त्यासहः पूर्वं ततो वाग्विस्तरासहः ॥ अथ चिंतासहस्तस्मादेवमेवाहमास्थितः ॥१॥

प करणः । अत एव प्राप्ताप्राप्तयोरपि विषये निर्वृतः परमसंतोषवान् नित्यतृप्तत्वादित्यर्थः ॥७॥ ॥ननु ज्ञा
नी कथं निर्विकल्पादिरूप इत्याशंक्याह । नानाश्चर्येति । अधिष्ठानसाक्षात्कारेण प्रसुप्तबोधे सति नानाश्चर्यमिदं विश्वं जगत् न किं
चित्तथ्यं किंतु मायाकृतमिति निश्चयी पुरुषः निवृत्तवासनः केवलः चिद्रूपः सन् न किंचिदिव विशेषव्यवहारागोचर एव शाम्यति । निवृत्तकार्यका
रणोपाधिर्भवति । तत्त्वज्ञानेन सर्वस्यापि संसारस्य निवृत्तेरित्यर्थः ॥८॥ ॥इति ज्ञानाष्टकं ॥ गुरुणादिष्टं ज्ञानं न किंचिदिव शाम्यति तत्त्ववित्
न प्रकाशयितुं शिष्यो वदति सांप्रतं ॥ उक्तं ज्ञानाष्टके न किंचिदिव शाम्यति । तदेव शिष्यः स्वास्मिन्निरादर्शयितुमेवमेवाष्टकमाह । तत्र प्रथ
मं कायकर्ममनसा व्यापारोपरममाह कायेति । अहं पूर्वं प्रथमं कायिकरूपकर्मासहः त्यक्तवान् ततो वाग्विस्तरासहः जपकर्मासहः । अथ अनं
मनोव्यापाररूपाया चिंताया असहः तस्माद्धेतोः एवमेव निर्व्यापार एव अहं आस्थितः आसाम स्थितः इत्यर्थः ॥१॥ ॥

उक्तव्यापारत्रयोपरमहेतुं वदन्नेवोक्तमनुवदति। प्रीत्यभावेनेति। क्षयिष्णुफलजनकस्य शब्दादेः शब्दकायकर्मद्वयस्य प्रीत्यभावे
न प्रीत्यविषयत्वेन आत्मनश्चादृश्यत्वेन त्रिविधविक्षेपेभ्यो व्यावृत्तं एकाग्रहृदयं यस्य स विक्षेपैकाग्रहृदयः इति मध्यमपदलोपी स
मासः। क्षयिष्णुफलकजपादेः प्रीत्यविषयत्वाज्जपादिरूपो स्य विक्षेपो नास्ति आत्मनश्चादृश्यत्वाद्ध्यानाद्यविषयत्वाच्चिन्तारूपो
विक्षेपो मम नास्तीत्यर्थः अत एवमेव स्वरूपेणैव अहमास्थितः॥२॥ ॥ननु तथापि समाध्यर्थं व्यवहारः कर्तव्य इत्याशंक्य नेत्याह
समाध्यासा इति। कर्तृत्वभोक्तृत्वाद्यनर्थाध्यासा हि भिन्ने सिद्धौ सत्यां निरासार्थं समाधये व्यवहारो नान्यथेति नियमं विलोक्य
शुद्धात्मनस्तु तन्निमित्ताध्यासाभावादेवमेव समाधिशून्य एवाहमास्थित इत्यर्थः॥३॥ ॥हेयेति। पूर्णात्मदर्शिनो मम हेयोपादेयवस्तु
नोर्विरहादेवममुना प्रकारेण हर्षविषादयोरप्यभावात्। अहो ब्रह्मन् गुरो अद्य अधुना अहमेवास्थित इत्यर्थः॥४॥ ॥आश्रमेति। आ
श्रमानाश्रमध्यानं च तथा तत्प्रयुक्तं चित्तस्वीकृतं चित्तवर्जनं एतैस्त्रिभिरेव मम विकल्पं संकल्पविकल्पं वीक्ष्य अहमेवमेव एतत्त्रितय

प्रीत्यभावेन शब्दादेरदृश्यत्वेन चात्मनः। विक्षेपैकाग्रहृदय एवमेवाहमास्थितः॥२॥ ॥समाध्यासादिविक्षिप्तौ व्यवहारः स
माधये। एवं विलोक्य नियममेवमेवाहमास्थितः॥३॥ ॥हेयोपादेयविरहादेवं हर्षविषादयोः। अभावादद्य हे ब्रह्मन्नेवमे
वाहमास्थितः॥४॥ ॥आश्रमानाश्रमध्यानं चित्तस्वीकृतवर्जनात्। विकल्पं मम वीक्ष्यैतैरेवमेवाहमास्थितः॥५॥ कर्मानुष्ठानम
ज्ञानाद्यथैवोपरमस्तथा। बुद्ध्वा सम्यगिदं तत्त्वमेवमेवाहमास्थितः॥६॥ अचिंत्यं चिंत्यमानोपि चिंतारूपं भजत्यसौ। त्यक्त्वा
तद्भावनं तस्मादेवमेवाहमास्थितः॥७॥ ॥एवमेतत्कृतं येन स कृतार्थो भवेदसौ। एवमेव स्वभावो यः स कृतार्थो भवेदसौ॥८॥
इत्येवमेवाष्टकं॥ ७॥ ७॥ ॥

रहित एवास्थितः॥५॥ ॥कर्मेति। यथैव कर्मानुष्ठानमज्ञानात् तथैव उपरमः कर्मोपरमोपि अज्ञानादेव इदं सम्यक् यथार्थतो बुद्ध्वा
अहमेवमेव कर्मतदुपरमरहित एवास्थितः॥६॥ ॥अचिंत्यमिति। अचिंत्यं ब्रह्मेति चिंत्यमानोप्यसौ आत्मा चिंतालक्षणं रूपं भज
ति। तस्माद्धेतोस्तद्भावनमचिंत्यं ब्रह्मेति भावनं त्यक्त्वा अहमेवमेव भावनारहित एवास्थितः॥७॥ ॥एवमेवेत्यवस्थायाः साधकोपि
श्रेष्ठः किंपुनस्तत्स्वभाव इति कैमुतिकन्यायेनाह। एवमेवेति। एतत् एवमेव सर्वक्रियारहितमेव स्वरूपे साधनवशात्कृतं सोसौ कृता
र्थो भवेत्। यस्तु एवमेव स्वभावात् सोसौ कृतार्थो भवतीति किं वक्तव्यमित्यर्थः॥८॥ ॥श्रीमद्विश्वेश्वरविरचितायामष्टावक्रटीकायामे
वमेवाष्टकं समाप्तं॥ ७॥ ७॥ ७॥ ७॥

॥ एवमेवेत्यवस्थायाः फलीभूतां सुखस्थितिं ॥ प्राह शिष्यस्फुटीकर्तुमहमासे यथासुखं ॥१॥ अथैवमेवेत्यवस्थायाः फलीभूतां सु
खावस्थां स्वकीयां विशदयितुमाह । अकिंचनेति । अकिंचनभवं सर्वसंगाभावप्रभवं स्वास्थ्यं । चित्तस्थैर्यं कौपीनत्वेपि कौपीनसक्तावपि
दुर्लभं । अस्मात्कारणादहं त्यागादाने विहाय त्यागादानयोरासक्तिं विहाय यथासुखं सुखमनतिक्रम्यासे न कदाचिद्दुःखीत्यर्थः ॥ कुत्रापी ॥१॥
ति । शारीरकर्मणि कायस्य खेदः । कुत्रापि वाचिककर्मणि जिह्वा खिद्यते । कुत्रापि ध्यानादिकर्मणि मनः खिद्यते अतो हेतोरहं तत्त्रयमपि त्य
क्त्वा सुखं यथा स्यात्तथा पुरुषार्थे स्वात्मन्येव स्थितः ॥२॥ ननु कायवाङ्मनोव्यापारत्यागे देह एव सद्यः पतेत् भोजनाम्बुपानादेरपि
त्यागादित्याशंक्याह । कृतमिति । शारीरेंद्रियादिभिः कृतं किमपि तत्त्वतः आत्मकृतं न स्यादिति मे विमृश्य यदा यच्छारीरकर्म कर्तु
मायाति तदहं कारयन्नन्यत्वेन कृत्वा अहं यथासुखमासे ॥३॥ ननु कर्मणा नैष्कर्म्येण वा एकत्र निष्ठावश्यं सा कार्या पुरुषार्थार्थिना त्य

अकिंचनभवं स्वास्थ्यं कौपीनत्वेपि दुर्लभं ॥ त्यागादाने विहायास्मादहमासे यथासुखं ॥१॥ कुत्रापि खेदः कायस्य जि
ह्वा कुत्रापि खिद्यते ॥ मनः कुत्रापि तत्त्यक्त्वा पुरुषार्थे स्थितः सुखं ॥२॥ ॥ कृतं किमपि नैव स्यादिति संचिन्त्य तत्त्वतः ।
यदा यत्कर्तुमायाति तत्कृत्वासे यथासुखं ॥३॥ ॥ कर्मनैष्कर्म्यनिर्बंधभावा देहस्थयोगिनः ॥ संयोगायोगविरहाद
हमासे यथासुखं ॥४॥ ॥ अर्थानर्थौ न मे स्थित्या गत्या वा शयनेन वा ॥ तिष्ठन् गच्छन् स्वपंस्तस्मादहमासे यथासुखं ॥
॥५॥ ॥ स्वपतो नास्ति मे हानिः सिद्धिर्यत्नवतो न वा ॥ नाशोल्लासौ विहायास्मादहमासे यथासुखं ॥६॥ ॥ सुखादिरू
पानियमं भवेष्वालोक्य भूरिशः ॥ शुभाशुभे विहायास्मादहमासे यथासुखं ॥७॥ ॥ इति यथासुखं समाप्तं ॥

शंक्याह कर्मेति कर्मनैष्कर्म्यनिर्बंधरूपाः भावाः स्वभावाद्देहस्थयोगिनः देहासक्तयोगिन एव अहं तु देहसंयोगायोगविरहादपि य
थासुखमासे ॥४॥ ॥ तथा च मम देहाद्यासंगाभावान्न कर्मनैष्कर्म्यनिर्बंध इत्यर्थः ॥ अथ लौकिकव्यापारेपि मम न निर्बंध इत्याह
अर्थेति । मम स्थित्यादिना साध्यौ अर्थानर्थौ न स्तः पूर्णानंदभिन्नत्वात् । तस्मादहमासनस्थः तिष्ठन् स्वपन् वा अहं यथासुखमासे ॥५॥
एतदेव स्पष्टतरेणाह । स्वपत इति । स्वपतो यत्नरहितस्य मे महाहानिर्नास्ति अस्मात्कारणात् यत्नलाभयत्नयोः हासोल्लासौ विहाय अहं य
थासुखमासे ॥६॥ ॥ सुखादीति । भवेषु अवतारेषु सुखादिरूपानियमं सुखदुःखादिधर्माणां अनित्यत्वं भूरिशो बहुशः दृष्ट्वा ।

अ॰टी॰
॥२४॥

उदारितां सुखावस्थां समर्थयति आत्मनि ॥ प्राह शिष्यः समावस्थां वक्तुं श्लोकं स्वगुरुं प्रति ॥१॥ ॥पूर्वं तु गुरुणोपशमाष्टकमुक्तं ॥ संप्रति तु शि-
ष्यः स्वस्य सुखावस्थासमर्थनार्थमात्मनः ॥ शमावस्थामाह ॥ प्रकृतेति ॥ प्रकृत्या स्वभावेन विषयेषु शून्यचित्तः प्रमादाद् बुद्धिपूर्वकमस्य भाव-
त शाद्भावान् ॥ विषयान् भावयति चिंतयतीति भावभावनः कृतवान् निद्रितो बोधित इव यथा ॥ निद्रावशात् शून्यचित्तः केन चित् बोधितस्त्वा प्रमादाद्भा-
वभावनः ॥ एवंविधो यः पुमान् विषयेषु ज्ञातचित्तः स हि निश्चितं क्षीणसंसरणः संसारे तु विषयानुस्मरणाभावादित्यर्थः ॥१॥ ॥क्व ध-
नानीति विषयभावनाशून्यस्य पूर्णात्मदर्शिनो मे यदा स्पृहा विषयगलिता तदा मे धनानि क्व विषयरूपा दस्यवः चौराः क्व
शास्त्रं क्व च विज्ञानमहं ब्रह्मास्मीति निदिध्यासनं क्व धनादि विज्ञानांतेषु च मम आस्था नास्तीत्यर्थः ॥२॥ ॥विज्ञाते इति देहेंद्रिया-
दीनां साक्षिपुरुषे त्वंपदार्थे परमात्मनि चेश्वरे तत्पदार्थे विज्ञाते ब्रह्माहमस्मीति साक्षात्कृते सति नित्यनिर्मुक्तचिद्रूपात्मनो नुभवात् मो-

प्रकृत्या शून्यचित्तो यः प्रमादाद्भावभावनः ॥ निद्रितो बोधित इव क्षीणसंसरणो हि सः ॥१॥ ॥क्व धनानि क्व मित्राणि क्व मे विष-
यदस्यवः ॥ क्व शास्त्रं क्व च विज्ञानं यदा मे गलिता स्पृहा ॥२॥ ॥विज्ञाते साक्षिपुरुषे परमात्मनि चेश्वरे ॥ नैराश्ये बंधमोक्षे च न चिं-
ता मुक्तये मम ॥३॥ ॥अंतर्विकल्पशून्यस्य बहिः स्वच्छंदचारिणः ॥ भ्रांतस्येव दशास्तास्तास्तादृशा एव जानते ॥४॥ इति शांति॥
यथातथोपदेशेन कृतार्थः सत्त्वबुद्धिमान् ॥ आजीवमपि जिज्ञासुः परस्तत्र विमुह्यति ॥१॥ ॥

संबंधेपि नैराश्ये सति मम मुक्त्यर्थं न चिंता ॥३॥ ॥ननु प्रमादात् भावभावकः कथं ज्ञातव्य इत्याह ॥ अंतर्विकल्पेति ॥ अंतःकरणे विक-
ल्पशून्यस्य बहिर्भ्रांतस्येव स्वच्छंदचारिणः ज्ञानिनो दशास्तास्तादृशा एव ज्ञानिन एव जानते ॥४॥ ॥इति श्रीमद्टि॰ अष्टावक्रटीकायां शांतिचतुष्कं॥
दुर्लक्ष्यमात्मनस्तत्त्वं प्राप्यापि तु मनस्यसा ॥ मुमुक्षूंस्त्वोपदेशार्थं गुरुराह दयानिधिः ॥१॥ यद्यपि प्रथममात्मतत्त्वोपदेशः कृत एव तथापि तदा-
त्मतत्त्वमंतेवासिभ्यः पुनः पुनरुपदेष्टव्यं दुर्लक्ष्यत्वात् ॥ यथा छांदोग्योपनिषदि नवकृत्वः श्वेतकेतुं प्रति वारंवारं शिक्षार्थं असकृदात्मोपदे-
शो गुरुराह ॥ तत्रादौ ज्ञानाधिकारिणमनधिकारिणं चाह ॥ यथातथेति ॥ सत्त्वबुद्धिमान् शिष्यो यथातथा आपाततोप्युपदेशेन कृतार्थः
स्यात् अत एव कृतयुगे प्रथममात्रोपदेशादपि शिष्याः कृतार्था बभूवुः ॥ परः असत्त्वबुद्धिर्यावज्जीवं जिज्ञासुरपि बहुधोपदिष्टोपि विमु- ॥२४॥
ह्यति ॥ यथा विरोचनो ब्रह्मणा बहुधोपदिष्टोपि मुमोहैवेत्यर्थः ॥१॥ ॥ ॥

अथ बंधमोक्षौ सुखोपायेन संग्रहेण निरूपयति। मोक्ष इति। विषयेष्वनुरागाभाव एव मोक्षः विषयेष्वनुरागस्तु बंधः एतावदेव बंधमोक्ष
योर्विशिष्टमुक्तं ज्ञानं एवं ज्ञात्वा त्वं यथेच्छसि तथा कुरु॥२॥ ॥इदं तु विषयवैरस्यं तत्त्वबोधसाध्यमित्याह। वाग्मीति। अयं प्रसिद्धः आत्मत
त्त्वबोधः। वाग्मिनं बहुसुखाख्यभाषिणं मूकं करोति। प्राज्ञं नानाविशेषवेदिनं जनं जडं करोति। महोद्योगिनं नानाक्रियानुष्ठानशालिनं अल
सं निष्क्रियं करोति। मनसः प्रत्यक्प्रवणत्वात् वागादयः कुंठिता भवंति। तदा ईहितो भवतीत्यर्थः। यतोयं तत्त्वबोधः वागादीन् कुंठितान् करोति
अतो हेतोर्भोगेच्छुभिस्त्यक्तः अनादृत इत्यर्थः॥३॥ ॥तत्त्वबोधस्य स्वरूपमुपदिशति। न त्वमिति। त्वं देहादिरूपो नः यतश्चिद्रूपोसि नापि तव देहः सं
बंधः असंगो ह्ययं पुरुष इति श्रुतेः। न वा भवान् कर्ता भोक्ता यतः कर्तृभोक्तृप्रसक्तौ न सदा साक्षी यो यस्य साक्षी स तद्भिन्नः यथा घटसाक्षी घटा
दित्यर्थः। अतस्त्वं देहसंबंधिषु निरपेक्षः सन् सुखं चरेत्यर्थः॥४॥ ॥निरपेक्षत्वमुपपादयन्नुमाह। रागेति। रागद्वेषौ तु मनोधर्मौ न तु तव बंध

मोक्षो विषयवैरस्यं बंधो वैषयिको रसः॥ एतावदेव विज्ञानं यथेच्छसि तथा कुरु॥२॥ वाग्मिप्राज्ञमहोद्योगं जनं मूकजडाल
सं॥ करोति तत्त्वबोधोयमतस्त्यक्तो बुभुक्षुभिः॥३॥ ॥न त्वं देहो न ते देहो भोक्ता कर्ता न वा भवान्॥ चिद्रूपोसि सदा साक्षी निरपे
क्षः सुखं चर॥४॥ रागद्वेषौ मनोधर्मौ न मनस्ते कदाचन॥ निर्विकल्पोसि बोधात्मा निर्विकारः सुखं चर॥५॥ ॥सर्वभूतेषु चा
त्मानं सर्वभूतानि चात्मनि॥ विज्ञाय निरहंकारो निर्ममस्त्वं सुखी भव॥६॥ विश्वं स्फुरति यत्रेदं तरंगा इव सागरे॥ तत्त्वमेव न संदेहश्चि
न्मूर्ते विज्वरो भव॥७॥

मौ। मनस्तु कदाचिदपि तव संबंधि न भवति। अतस्त्वद्ध्यासाद् रागाद्यध्यासं मा कुर्वित्यर्थः॥ ननु रागद्वेषौ मम बंधमोक्षौ कथं नेत्याह। निर्विक
ल्प इति। यतस्त्वं निर्विकल्पः बोधात्मा वासि। अतो रागादिविकाररहितः सन् सुखं चरेत्यर्थः॥५॥ ॥सर्वेति। सर्वभूतेषु कारणत्वेनानुस्यू
तमात्मानं विज्ञाय विभाव्य सर्वभूतानि चात्मनि अध्यस्तानीति विभाव्य अहंकारादेस्सर्वस्यात्मत्वेनैव स्फुरणात् अहं ममाभिमान
रहितः सन् सुखी भव॥६॥ ॥सर्वभूतानि चात्मनीत्येतद्दृशं दर्शयति। विश्वमिति। यत्र इदं विश्वं सागरे तरंगा इवाधिष्ठानाभिन्नं तच्चैत
वि न्यं त्वमेव अतः कारणात् हे चिन्मूर्ते त्वं विज्वरो भव। चिन्मात्रोहमित्यनुभवान्निवृत्तः सर्वसंतापो भवेत्यर्थः॥७॥ ॥श्रीरामायनमः॥ ॥७॥

परमकारुणिकतया पुनः पुनर्बोधयति। श्रद्धत्स्वेति। श्रद्धत्स्व तात श्रद्धत्स्व अत्र चिद्रूपता या असंभावना विपरीतभावना रूपमोहं न कुरुष्व
त्वं कोऽसि अस्य पते। ज्ञानेति। ज्ञानस्वरूपः प्रकृतेः परस्त्वं। कीदृशस्त्वं भगवान् ऐश्वर्यादिमान् इत्यर्थः। तथा आत्मा त्वं पदार्थः॥८॥ ॥गुणैरिति॥ गुणैस्त्रि
यादिभिः संवेष्टितो देहः इहलोके तिष्ठति। तथा आयाति तथा किंचित्कालं याति गच्छति देहादिभिन्न आत्मा तु न गन्ता नाप्यागन्ता। अतो
हं विनश्यामीत्येवमेनं किं शोचसि देहधर्मैरात्मानं मा शुच इत्यर्थः॥९॥ ॥नापि देहस्थित्युत्क्रान्तिभ्यां तव वृद्धिहानी इत्याह देह इति। नि
त्य चिन्मात्ररूपिणस्तव देहस्थित्या न वृद्धिर्न वा देहनिवृत्त्या हानिरित्यर्थः॥१०॥ ॥त्वयीति॥ विश्वाख्या वीचिरपि त्वय्यनन्तचित्समु
द्रे उदेतु अथवास्तमायातु एतावतापि तेन वृद्धिर्न वा क्षतिः तवानन्तत्वादित्यर्थः॥११॥ ॥तातेति। सर्वस्य तदभिन्नत्वात् किं हेयमुपा
देयं कथं केन वा प्रकारेण हेयमुपादेयं कुत्र वा हेयमुपादेयमित्यर्थः॥१२॥ ॥एकस्मिन्निति। एकस्मिन् सजातीयविजातीयस्वगत

श्रद्धत्स्व तात श्रद्धत्स्व नात्र मोहं कुरुष्व भो। ज्ञानस्वरूपो भगवानात्मा त्वं प्रकृतेः परः॥८॥ गुणैः संवेष्टितो देहस्तिष्ठ
त्यायाति याति च॥ आत्मा न गन्ता नागन्ता किमेनमनुशोचसि॥९॥ ॥देहस्तिष्ठतु कल्पान्तं गच्छत्वद्यैव वा पुनः। क्व वृद्धिः क्व
वा हानिस्तव चिन्मात्ररूपिणः॥१०॥ ॥त्वय्यनन्तमहाम्भोधौ विश्ववीचिः स्वभावतः। उदेतु वास्तमायातु न ते वृद्धिर्न
वा क्षतिः॥११॥ ॥तात चिन्मात्ररूपोऽसि न ते भिन्नमिदं जगत्॥ अतः कस्य कथं कुत्र हेयोपादेयकल्पना॥१२॥ ॥एकस्मि
न्नव्यये शान्ते चिदाकाशेऽमले त्वयि॥ कुतो जन्म कुतः कर्म कुतोऽहंकार एव च॥१३॥ ॥यत्त्वं पश्यसि तत्रैकस्त्वमेव प्रतिभाससे॥ किं
पृथग्भासते स्वर्णात्कटकाङ्गदनूपुरं॥१४॥ अयं सोऽहमयं नाहं विभागमिति संत्यज॥ सर्वमात्मेति निश्चित्य निःसंकल्पः सुखी भव॥१५॥

भेदशून्येऽव्यये शान्ते च। कार्यशून्ये चिदाकाशे निर्मले च। सर्वोपाधिशून्ये त्वयि कुतो जन्म कुतश्च कर्म कुतश्चाहंकारः। द्वितीयस्य हेतोरभावात् अ
व्ययस्य च जन्मासंभवात्। कार्यशून्यस्य च कर्मकर्तृत्वासंभवात्। निर्मलस्य चाहंकारासंभवादित्यर्थः॥१३॥ ॥एकत्वमुपपादयति यत्त्वमि
ति। यद्यत्कार्यं त्वं पश्यसि तत्र कारणरूपस्त्वमेव एकः प्रतिभाससे। कटकाङ्गदादीः स्वर्णवदित्यर्थः॥१४॥ अयं सोऽहमिति। कारणरूप आ
त्मैव सर्वमिति निश्चित्य भेदभ्रमं त्यज। तथा च निर्विकल्पो विगतनानाप्रतिभासः सन् सुखी भव। द्वितीयप्रतिभाति तेनापि दुःखं भवतीत्यर्थः॥१५॥

विभाग त्यागि मुक्तिमाह। तवैवेति। तवैवाज्ञानतो विश्वं विश्वाकारो विक्षेपः। अतः परमार्थतस्त्वमेकः। अतः संसार्यसंसारि वा त्वत्तो ना
न्यः कश्चिदित्यर्थः॥१६॥ ॥भ्रान्तिमात्रमिति। इदं विश्वं भ्रान्तिमात्रं सिद्धं। अतो हेतोर्न किंचित्पृथक्सत्तारहितमित्यर्थः। इति निश्चयी। अत एव
सर्वस्य निरस्तत्वान्निर्वासनः स्फूर्तिमात्रो वासनारहितः स्फूर्तिमात्रः सन् न किंचिदिव निरस्तशेषविशेषः सन् शाम्यति॥१७॥ ॥
एक एवेति। कालत्रयेऽपि भवाम्भोधौ एकस्त्वमेव अतस्तव बंधमोक्षौ न स्तः। अतस्त्वं कृतकृत्यः सन् सुखं चर॥१८॥ ॥मा संकल्पेति। हे चिन्म
य त्वं संकल्पविकल्पाभ्यां चित्तं मा क्षोभय। उपशाम्य। उपरतसंकल्पविकल्पो भव। आनंदरूपे स्वात्मनि सुखं तिष्ठ॥१९॥ ॥ध्यानमपि त्यजेत्या
ह। त्यजेति। सर्वत्र ध्यानं त्यज। कुत्रापि ध्यानं मा कुर्वित्यर्थः॥ एतदेव विषादयति मा किंचिद्धृदि धारयेति। मननमपि त्यजेत्याह। आत्मेति। आ
त्मा त्वं सदा मुक्त एवासि अतो विमृश्य विचार्य किं फलं करिष्यसि। नित्यमुक्तत्वादित्यर्थः॥२०॥ ॥इति श्रीमहेश्वरविरचितायां अष्टावक्र
टीकायां तत्त्वोपदेशविंशतिप्रकरणं। पृथक्सत्वेन सर्वस्य विस्मृतिर्मुक्तिसाधनं। तत्स्थानर्थविच्छेदद्वारेणेत्यत्र वर्ण्यते॥१॥ ॥तत्त्वज्ञा

तवैवाज्ञानतो विश्वं त्वमेकः परमार्थतः॥ त्वत्तोऽन्यो नास्ति संसारी नासंसारीति कश्चन॥१६॥ ॥भ्रान्तिमात्रमिदं विश्वं न किंचि
दिति निश्चयी॥ निर्वासनः स्फूर्तिमात्रो न किंचिदिव शाम्यति॥१७॥ ॥एक एव भवाम्भोधावासीदस्ति भविष्यति॥ न ते बंधो
ऽस्ति मोक्षो वा कृतकृत्यः सुखं चर॥१८॥ ॥मा संकल्पविकल्पाभ्यां चित्तं क्षोभय चिन्मय॥ उपशाम्य सुखं तिष्ठ स्वात्मन्या
नंदविग्रहे॥१९॥ ॥त्यजैव ध्यानं सर्वत्र मा किंचिद्धृदि धारय॥ आत्मा त्वं मुक्त एवासि किं विमृश्य करिष्यसि॥२०॥ ॥
तत्त्वोपदेशविंशतिकं॥ ॥आचक्ष्व शृणु वा तात नानाशास्त्राण्यनेकशः॥ तथापि न तव स्वास्थ्यं सर्वविस्मरणादृते॥१॥ ॥

नेन सर्वप्रपंचस्य पृथक्सत्ताया विस्मरणकारणे स्वास्थ्यापायादिद्वारा मुक्तिर्नान्यथेति विशेषमुपदिशति॥ आचक्ष्वेति। हे तात त्वं ना
नाशास्त्राणि अनेकशः अनेकवारं शिष्येभ्यः आचक्ष्व गुरुभ्यः शृणु वा तथापि न तव सर्वविस्मरणादृते। स्वास्थ्यं श्रेयो नेत्यर्थः। सुषुप्ते
तु यद्यपि विषयस्मरणमस्ति तथापि अज्ञानविस्मरणं नास्तीति भावः। जीवन्मुक्तस्य तु सर्वस्याध्यस्तत्वानुसंधानरूपविस्मर
णमस्तीति भावः॥१॥ ॥

अ.टी.

सर्वविस्मरणे सति स्वस्वरूपमुपविश्य चित्तं निरस्तसर्वाशं भवतीति स्वयमाह। भोगमिति। हे विज्ञ त्वं भोगं कुरु कर्म वा कुरु समाधिं कुरु तथापि चित्तं
॥१६॥ अत्यर्थं रोचयन्तीति रुचिमुत्पादयिष्यति। कीदृशं चित्तं। निरस्तसर्वाशं सर्वविस्मरणे सति सर्वाशानुदयादित्यर्थः॥२॥ ॥आयासादिति
सकलो जनः आयासादेव दुःखी भवति। परन्तु कश्चन एनमायासं न जानाति दुःखहेतुत्वमर्थमिति न वेत्ति। अनेनेति। आयासात्सकलो दुः
खीत्यनेनैवोपदेशेन धन्यः सुकृती निर्वृतिं परमसुखं प्राप्नोति॥३॥ ॥व्यापारासक्तिः सुखहेतुरित्याह व्यापार इ। यो निमेषोन्मेषयो
रपि व्यापारे खिद्यते अनासक्तो भवति तस्य आलस्यधुरीणस्य क्रियाभिनिवेशरहितस्य सुखं नान्यस्य क्रियाभिनिवेशयुक्तस्य॥४॥
सर्वतृष्णाविलये सति द्वंद्वहानिरपि भवतीति स्वयमाह। इदं कृतमिति। इदं कृतमिदं नेत्यादि द्वंद्वैर्मुक्तं यदा मनो भवति तदा पुरुषा
र्थचतुष्टयेपि निरपेक्षं भवेत्। द्वंद्वहानौ तस्य जीवन्मुक्तत्वादित्यर्थः॥५॥ ॥पुरुषार्थकामनानिरपेक्षस्तु विरक्तरक्ताभ्यां विलक्षण
इत्याह विरक्त इति। मुमुक्षुः सन् यो विषयद्वेष्टा स विरक्तः कथ्यते। कामसापेक्षः सन् विषयलोलुपः सरागीति कथ्यते। यस्तु ग्रहमोक्षे

भोगं कर्मसमाधिं वा कुरु विज्ञ तथापि ते॥ चित्तं निरस्तसर्वाशमत्यर्थं रोचयिष्यति॥२॥ ॥आयासात्सकलो दुःखी नैनं जाना
ति कश्चन॥ अनेनैवोपदेशेन धन्यः प्राप्नोति निर्वृतिं॥३॥ ॥व्यापारे खिद्यते यस्तु निमेषोन्मेषयोरपि॥ तस्यालस्यधुरीणस्य
सुखं नान्यस्य कस्यचित्॥४॥ ॥इदं कृतमिदं नेति द्वंद्वैर्मुक्तं यदा मनः॥ धर्मार्थकाममोक्षेषु निरपेक्षस्तदा भवेत्॥५॥ ॥वि
रक्तो विषयद्वेष्टा रागी विषयलोलुपः॥ ग्रहमोक्षविहीनस्तु न विरक्तो न रागवान्॥६॥ ॥हेयोपादेयता तावत्संसारविटपां
कुरः॥ स्पृहा जीवति यावद्वै निर्विचारदशास्पदं॥७॥ प्रवृत्तौ जायते रागो निवृत्तौ द्वेष एव हि॥ निर्द्वंद्वो बालवद्धीमानेवमेव व्यवस्थितः॥८॥

भ्यां विहीनः स विरक्तसरक्ताभ्यां विलक्षणः सर्वतो निरपेक्षतया हानोपादानव्यवहाररहितत्वादित्यर्थः॥६॥ ॥ननु ज्ञानिनोपि हानोपादानादिव्यव
हारो दृश्यत इत्यत आह। हेयोपादेयतेति। निर्विचारदशास्पदं अविवेकदशामयी भूता स्पृहा तत्स्थाज्जीवति तावत्पर्यन्तमेव हेयोपादेयहानो
पादानादिव्यवहारसंसारवृक्षस्य शाखांकुरो भवति। ज्ञानिनो तु स्पृहाभावात् सत्यपि हानादिव्यवहारे संसारशाखाप्रसरो न भवती
त्यर्थः॥७॥ ॥प्रवृत्ताविति प्रवृत्तौ सरागप्रवृत्तौ सत्यामुत्तरोत्तरं विषयेषु रागो जायते विषयद्वेषपूर्वक निवृत्तौ सत्यामुत्तरोत्तरं विषय ॥१६॥
द्वेष एव हि जायते अतो धीमान् ज्ञानी बालवच्छुभाशुभानुसंधानरहितः निर्द्वंद्वः रागद्वेषविहीनः सन् एवमेव रागजप्रवृत्तिद्वेषजनिवृत्तिरहि
त एवास्थितः। केवलमारब्धवशादेव कदाचित्प्रवर्तते कदाचिन्निवर्तते न तु रागद्वेषवशादित्यर्थः॥८॥ ॥श्रीराम॥

बोधेति यस्मात् ज्ञानिनो विश्वविलये प्रपंचोपरमे बाधा नास्ति तस्य प्रपंचस्य स्थितौ न द्वेषो नास्ति अधिष्ठानत्वेनैव स्फुरणात् तस्मा
त्कारणात् धन्योपि विद्वान् प्रारब्धवशात् प्राप्तयाप्राप्तया वा जीविकया सुखमनातिकष्टेनास्त इत्यर्थः ॥७॥ ॥कृतार्थ इति ॥ अहमं
नेनाद्वैतात्मज्ञानेन कृतार्थ इत्येवं गलितधीः कृती ईक्षणादिकं कुर्वन्नपि सुखमनातिकष्टेनास्ते कृतार्थत्वाद्धियः सत्वाद्बहिरिंद्रियव्या
पारे सत्यपि अज्ञानीव रक्तवत् न स्पृहावेशेन भवतीत्यर्थः ॥८॥ ॥शून्येति ॥ क्षीणः संसारसागरो यस्य तस्मिन् क्षीणसंसारसागरे पु
रुषे स्पृहा विषये शामिनः कायेंद्रियव्यापारो बालोन्मत्तादिवद्दिन्याहा ॥ शून्येति ॥ तस्य दृष्टिर्मनोव्यापारः शून्यः संकल्पविकल्प
रहितः चेष्टा कायव्यापारः वृथा फलमनुद्दिश्यैव ॥ तस्य इंद्रियाणि विकलानि पुरःस्थितानामपि विषयाणामग्रहणात् विकलत्वात्
तदुक्तं स्याजाग्रत्तिसृतानि सा निशा पश्यतो मुनेरिति ॥९॥ ॥नजागर्ति निद्राति न जागर्ति जाग्रदवस्थावान्न भवति अत्र

न जातु विश्वविलये न द्वेषस्तस्य च स्थितौ ॥ यथा जीविकया तस्माद्धन्य आस्ते यथासुखं ॥७॥ ॥कृतार्थोनेन ज्ञाने
नेत्येवं गलितधीः कृती ॥ पश्यन् शृण्वन् स्पृशन् जिघ्रन्नश्नन्नास्ते यथासुखं ॥८॥ ॥शून्या दृष्टिर्वृथा चेष्टा वि
कलानींद्रियाणि च ॥ न स्पृहा न विरक्तिर्वा क्षीणसंसारसागरे ॥९॥ ॥नजागर्ति न निद्राति नोन्मीलति न मीलति ॥ अ
हो परदशा कापि वर्तते मुक्तचेतसः ॥१०॥ ॥सर्वत्र दृश्यते स्वस्थः सर्वत्र विमलाशयः ॥ समस्तवासनामुक्तो मुक्तः सर्वत्र
राजते ॥११॥ ॥पश्यन् शृण्वन् स्पृशन् जिघ्रन्नश्नन् गृह्णन् वदन् व्रजन् ॥ ईहितानीहितैर्मुक्तो मुक्त एव महाशयः ॥१२॥ ॥
न निंदति न च स्तौति न हृष्यति न कुप्यति ॥ न ददाति न गृह्णाति मुक्तः सर्वत्र नीरसः ॥१३॥ ॥

प हि विषयानुसंधानादिहेतुमोहा नोन्मीलतीति ॥ बाह्यविषयान्नानुसंधत्त इत्यर्थः ॥ तथा ज्ञानी न निद्राति प्रत्यो न्मीलति जडो न्म
त्तवत् अन्यथा सर्वान् विषयान् प्रपश्यतीत्यर्थः ॥ कानीहि तस्य दशोच्यत आह अहो इति आश्चर्यं मुक्तचेतसः कापि अलौकिकी परदशा
उत्कृष्टावस्था तुरीयातीतेत्यर्थः ॥१०॥ ॥इदमेव विवारयति ॥ सर्वत्रेति ॥ सर्वत्र सुखदुःखेन स्वस्थचित्तः तथा सर्वत्र शत्रौ मित्रे च विम
लाशयः समानदर्शी यतः समस्तविषयवासनया मुक्तः अत एव मुक्तः सर्वत्र सर्वो सुखासु राजते दीप्यते पूर्णात्मदृष्टित्वात् ॥११॥
पश्यन्निति आरब्धवशाद् दर्शनादिकं बोद्धेंद्रियव्यापारं कुर्वन्नपि ईहितानीहितैः रागद्वेषैर्मुक्तो महाशयो महतिआत्म
नि आशयो यस्य स महाशयो मुक्त एव मनोविकाराणामभावात् ॥१२॥
उद्वेगमेव विवादयति न निंदतीति स्पष्टं ॥१३॥ ॥

॥१७॥

किंच सानुरागमिति ॥ सानुरागां स्त्रियं दृष्ट्वा ॥ अथवा समुपस्थितं मृत्युं दृष्ट्वा अविह्वलमनाः कामभयाभ्यां विमुक्तमनाः महाशयो मु
क्त एव ॥१४॥ किंच सुखेति स्पष्टं ॥१५॥ न हिंसेति ॥ क्षीणसंसरणे अनरे नराभिमानरहिते विदुषि हिंसा सानामपरद्रोह इत्यादि
यो मनोविकारा न भवंतीत्यर्थः ॥१६॥ ॥न मुक्त इति ॥ जीवन्मुक्तः विषयद्वेष्टापि न ना विषयलोलुपः किंतर्हि असंसक्तमनाः सन्
प्रारब्धवशात् प्राप्तंप्राप्तमुपाश्नुते ॥ भुंक्त इत्यर्थः ॥१७॥ समाधानेति ॥ बहिः शून्यचित्तो ज्ञानी समाधानादि विविधाः कल्पनाः न
जानाति उपेक्षते विदेहकैवल्यं प्राप्त इव ॥१८॥ ॥निर्ममेति ॥ अहंममाभिमानशून्यः स्वाधिष्ठानातिरिक्तं न किंचिदिति निश्च
यवान् अत एव अंतर्गलितसर्वाशः अत एव कुर्वन्नपि न करोति कर्तृत्वाभिमानरहितत्वादित्यर्थः ॥१९॥ ॥मन इति ॥ गलितं सविशेष
वृत्तिहीनं मानसं यस्य स ज्ञानी कामपि अनिर्वाच्यां दशां संप्राप्तो भवेत् तदेव दर्शयति मन इति ॥ मनःप्रकाशो विवर्जितः सविशेषप्र
काशाभावात् तथा संमोहविवर्जितः प्रत्यक्प्रवणचित्तत्वात् अत एव स्वप्नविवर्जितो जाड्यसुषुप्त्या च वर्जित इत्यर्थः ॥२०॥ इति तत्वज्ञस्व

सानुरागां स्त्रियं दृष्ट्वा मृत्युं वा समुपस्थितं ॥ अविह्वलमनाः स्वस्थो मुक्त एव महाशयः ॥१४॥ सुखे दुःखे नरे नार्यां संपत्सु
च विपत्सु च ॥ विशेषो नैव धीरस्य सर्वत्र समदर्शिनः ॥१५॥ न हिंसा नैव कारुण्यं नौद्धत्यं न च दीनता ॥ नाश्चर्यं नैव च क्षोभः
क्षीणसंसरणे नरे ॥१६॥ न मुक्तो विषयद्वेष्टा न वा विषयलोलुपः ॥ असंसक्तमना नित्यं प्राप्ताप्राप्तमुपाश्नुते ॥१७॥ स
माधानासमाधानहिताहितविकल्पनाः ॥ शून्यचित्तो न जानाति कैवल्यमिव संस्थितः ॥१८॥ निर्ममो निरहं
कारो न किंचिदिति निश्चितः ॥ अंतर्गलितसर्वाशः कुर्वन्नपि न लिप्यते ॥१९॥ मनःप्रकाशसंमोहस्वप्नजाड्यवि
वर्जितः ॥ दशां कामपि संप्राप्तो भवेद्गलितमानसः ॥२०॥ ॥इति तत्वज्ञस्वरूपविंशतिकं ॥ ॥श्रीराम ॥ ॥
यस्य बोधोदये तावत् स्वप्नवद्भवति भ्रमः ॥ तस्मै सुखैकरूपाय नमः शांताय तेजसे ॥१॥ ॥रूपविंशतिकं समाप्तं श्री

तत्वभिज्ञाफलीभूतशमस्यैव प्रधानतां ॥ व्याख्यातुं वर्णते शांतिः शतश्लोकैः पुनः स्फुटं ॥१॥ तत्र तावच्छांतेः प्रधानत्वे तिरव्यापयितुं फ
लीभूतां शांतिं वर्णयितुकामः शांतिशालिनं नमस्करोति ॥ यस्येति ॥ बोधोदये सति तावत्क्षणमेव प्रपंचभ्रमः स्वप्नवत् तुच्छो यस्य
भवति शांतो भवति तस्मै शांताय निरस्तसंकल्पविकल्पाय अत एव सु
खैकरूपाय दुःखाननुविद्धसुखस्वभावाय अत एव तेजसे स्वप्रकाशा
य विदुषे नमः ॥१॥ ॥

अष्टावक्री

॥२८॥

अभावरूपोपि प्रपंचः कालादिवशात् भावस्वभावत्वात् व्याह नास्तीति भावाभावेषु

ननु धनिनोपि सुखिनो दृश्यंते। तत्कथं ज्ञातसंकल्प एव सुखैकरूप इत्याशंक्याह। अर्जयित्वेति। अखिलानर्थान् धनधान्यकान्तादीनर्जे
यित्वा पुष्कलान् बहुविधान् भोगानेव आप्नोति। न तु सुखैकरूपस्तत्रापि दुःखभागित्वात्। सर्वपरित्यागमंतरेण न सर्वसंकल्पविक
ल्पत्यागं विना सुखी सुखैकरूपो न हि भवेत् नैव स्यात्॥२॥ संकल्पविकल्पयोस्तु त्यागः तु घात्वज्ञानमेव त्यागमात्रस्य यथा बंध्या
पुत्र तु घटज्ञानमेव त्यागः असतस्त्यागासंभवात् दुःखमेव रूपकालंकारेण विशदयति॥३॥ ॥कर्तव्येति। कर्तव्यानि यानि कर्माणि
तज्जनितानि दुःखान्येव मार्तंडस्तत्ज्वालाभिः खरतरसूर्यातपस्तेन दग्धः अंतरात्मा मनो यस्य तस्य संकल्पप्रशमामृतधारालक्षण
आसारं विना सुखं कुतः स्यात्॥३॥ ॥संकल्पप्रशमस्यामृतत्वं संसाररूपविषयनिवर्तकत्वादित्याशयेनाह भवोयमिति। अयं
भवः। भावनामात्रः संकल्पमात्रप्रभवः परमार्थत आत्मव्यतिरिक्तं किंचिन्नास्ति। परमार्थतस्तु आत्मैव भावरूपः। ननु अभाव

अर्जयित्वाखिलानर्थान् भोगानाप्नोति पुष्कलान्॥ नहि सर्वपरित्यागमंतरेण सुखी भवेत्॥२॥ ॥कर्तव्यदुःखमा
र्तंडज्वालादग्धांतरात्मनः॥ कुतः प्रशमपीयूषधारासारमृते सुखं॥३॥ ॥भवोयं भावनामात्रो न किंचित्परमार्थ
तः॥ नास्त्यभावः स्वभावानां भावाभावविभाविनां॥४॥ ॥न दूरं न च संकोचाल्लब्धमेवात्मनः पदं॥ निर्विकल्पं
निरायासं निर्विकारं निरंजनं॥५॥ ॥रूपापि प्रपंचः कालादिवशात् भावस्वभावत्वात् व्याह नास्तीति। भावाभावेषु

विभाविनां स्थितानां स्वभावानां अभावो नास्ति न हि उत्पन्नस्य स्वभावो वह्नेः कदाचिदपि शीतलस्वभावो दृष्टः तथा च मनोराज्यवत् भा
वनामात्रसिद्धस्य स्वाभावः प्रपंचोऽभावनानिरन्तरं निवर्तते इति संकल्पप्रशमः संसारविषतापापहः आत्मामृतप्राप्तिहेतु
त्वादमृतमिति भावः॥४॥ ॥ननु संकल्पोपरममात्रेण कथमात्मामृतप्राप्तिरित्याशंक्य तस्य नित्यप्राप्तत्वमाह न दूरमिति। आत्म
नः पदं स्वरूपं दूरं नास्ति नापि संकोचात् दूरे तु परिच्छिन्नं नास्ति परिपूर्णत्वात्। अत एवात्मनः पदं नित्यलब्धं प्राप्तमेवास्ति। संकल्प
वशात् पुनरप्राप्तमिवाविद्वांसो मन्यते। कंठगतचामीकरवत्। कीदृशं पदं निर्विकल्पं विकल्पातीतं। विकल्पाभावगम्यत्वात् तथा नि ॥२८॥
रायासं आयासातीतं तदभावगम्यत्वात्। निर्विकारं विकारातीतं निरंजनं उपाधिमलशून्यं॥५॥ ॥

हातुमिति। यस्तु रागी सुखदुःखजिहासया संसारं हातुमिच्छति। वीतरागस्तु निर्दुःखः रागो हि दुःखहेतुत्वात् तस्मिन् संसारे सत्यपि न खि
द्यत इति। खेदं न प्राप्नोति॥९॥ ॥यस्येति। अहं ज्ञानी मुक्त एवेत्येवं यस्य मोक्षेप्यभिमानो नासौ ज्ञानी तथा अहं योगाभ्यासी देहस्यै
व गुणधर्मजरतः ममदेहो बहुआहारबहुपवासादिसमर्थ इत्येवं देहेप्यभिमानो नासौ योगी न वा ज्ञानी केवलमसौ दुःखभाक् दुःख
हेतुत्वाहंममाभिमानानां। ईश्वरेरित्यर्थः॥१०॥ ॥सर्वविस्मरणादृते इत्यपूर्वं हर इति हर इति स्पष्टं॥११॥ ॥इति विशेषोपदेशप्रकरणं॥
अथातः श्लोकविंशत्या तत्त्वज्ञस्य स्वरूपं प्रोच्यते॥ विद्यातत्त्वप्रकर्षस्य व्यक्तये गुरुणा स्फुटं॥१॥ ॥अथान्येषामपि विद्यायाः प्रवृत्यर्थं
तत्वज्ञानफलविख्यापयिषया तत्वज्ञस्य दशां गुरुर्निरूपयति तेनेति। तेनैव ज्ञानफलं प्राप्तं य आत्मन्येव तत्प्राप्तभोगादिना अत एव स्वच्छे
न्द्रियो विषयानासक्तेन्द्रियः सन् एकाकी विषयसंयोगं विनैव नित्यं आत्मन्येव रमते॥१॥ न कदाचिदिति। हंतेति सहर्षसंबोधने

तेन ज्ञानफलं प्राप्तं योगाभ्यासफलं तथा। तृप्तः स्वच्छेन्द्रियो नित्यमेकाकी रमते तु यः॥१॥ ॥न कदाचिज्जगत्यस्मिन् तत्त्व
ज्ञो हंत खिद्यते॥ यत एकेन तेनेदं पूर्णं ब्रह्मांडमंडलं॥२॥ न जातु विषयाः केपि स्वारामं हर्षयंत्यमी॥ शल्लकीपल्लवप्री
तमिवेभं निंबपल्लवाः॥३॥ ॥यस्तु भोगेषु भुक्तेषु न भवत्यधिवासितः। अभुक्तेषु निराकांक्षी तादृशो भवदुर्लभः॥४॥
बुभुक्षुरिह संसारे मुमुक्षुरपि दृश्यते॥ भोगमोक्षनिराकांक्षी विरलो हि महाशयः॥५॥ ॥धर्मार्थकाममोक्षेषु जीवितमरणे तथा॥
कस्याप्युदारचित्तस्य हेयोपादेयता न हि॥६॥

हे शिष्य अस्मिन् जगति कदाचिदपि तत्त्वज्ञो न खिद्यते। यत एकेनैव तेनेदं ब्रह्मांडमंडलं पूर्णं व्याप्तं। अतो द्वितीयस्याभावात् न खिद्यतीत्यर्थः॥
॥२॥ ॥न जात्विति। यस्तु स्वस्मिन्नात्मन्येव रमते तं स्वारामं जातु कदाचित् अमी विषया न हर्षयंति। तुच्छत्वात्। यथा सल्लकीपल्लवप्रीतं
इभं गजं निंबपल्लवा न हर्षयंति। कटुत्वादित्यर्थः॥३॥ यस्त्विति। यस्य भुक्तेषु भोगेषु आसक्तिर्न भवति अभुक्तेषु आकांक्षा न भवति आत्मतृप्तत्वात् ता
दृशो भवदुर्लभः। संसारे कोपि विरल इत्यर्थः॥४॥ बुभुक्षुरिति। संसारे बुभुक्षुर्मुमुक्षुश्चानेकधा दृश्यते। भोगमोक्षनिराकांक्षी महति पूर्णे ब्रह्मणि
आशयो अंतःकरणं यस्य स महाशयो विरलः यतनामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वत इति भगवद्वचनात्॥५॥ ॥धर्मार्थेति। पुरुषार्थेषु चेष्ट

[illegible]

नतुकथंतर्हितत्वज्ञानेनतत्प्राप्तिर्व्यवहारिया:शास्त्रकारणमित्याशंक्यभ्रांतिनाशमात्रादेवेत्याह।व्यामोहेति।ज्ञानेननिरावरणदृष्ट
य:अविद्यानाशतदृष्टय:व्यामोहमात्रस्यप्रपंचभ्रांतिमात्रस्यविरतौसत्यांस्वरूपादानमात्रत:आत्मविश्रांतिमात्रतोवीतशोकाविरा
जंतेसर्वदास्वभावेनैवस्फुरंतिद्वितीयतयाप्रकाशंतइत्यर्थ:॥६॥ ॥आत्मज्ञानरहस्यमाह।समस्तमिति।स्पष्टार्थमिदमिति॥७॥ ॥समस्तंक
ल्पनामात्रमिति।ज्ञानस्यनिदानभूततत्वंपदार्थज्ञानैक्यमाह।आत्मेति।आत्मा त्वंपदार्थ:ब्रह्मतत्पदार्थाभिन्नइतिनिश्चित्यअधिष्ठानसा
क्षात्काराद्भावाभावौघटादितदभावौकल्पितावितिनिश्चित्यतथाचसर्वस्यतुच्छत्वानुसंधानात्कामहेत्वविद्याविलयाच्चनिष्काम:
सन्किंविशिष्टतयाजानाति।किंब्रूतेकिंचकार्यंकरोतिकर्तृत्वाभिमानरहितत्वात्ज्ञातापिवक्तापिनक्रियाकर्तापिनेत्यर्थ:॥८॥ ॥स
र्वमात्मेतिज्ञानेसर्वकल्पनानिवर्तकमित्याह।अयमिति।सर्वमात्मेतिनिश्चित्यअनुभूयतूष्णींभूतस्यनिवृत्तिपराग्व्यापारस्यपुंसइति

व्यामोहमात्रविरतौस्वरूपादानमात्रत:॥वीतशोकाविराजंतेनिरावरणदृष्टय:॥६॥ ॥समस्तंकल्पनामात्रमात्मामुक्त:
सनातन:॥इतिविज्ञायधीरोहिकिमभ्यस्यतिबालवत्॥७॥आत्माब्रह्मेतिनिश्चित्यभावाभावौचकल्पितौ॥निष्काम:किं
विजानातिकिंब्रूतेचकरोतिकिं॥८॥ ॥अयंसोहमयंनाहमितिक्षीणाविकल्पना:॥सर्वमात्मेतिनिश्चित्यतूष्णीं
भूतस्ययोगिन:॥९॥ ॥नविक्षेपोनचैकाग्र्यंनातिबोधोनमूढता॥नसुखंनचवादु:खमुपशांतस्ययोगिन:॥१०॥ ॥
स्वाराज्येभैक्षवृत्तौचलाभालाभेजनेवने॥निर्विकल्पस्वभावस्यनविशेषोस्तियोगिन:॥११॥ ॥क्वधर्म:क्व
वाकाम:क्वचार्थ:क्वविवेकिता॥इदंकृतमिदंनेतिद्वंद्वैर्मुक्तस्ययोगिन:॥१२॥ ॥विविधा:कल्पना:क्षीणाभवंतिइतीति।किंअहंक

व रोमिएवाहंपूर्वदिनेकृतमकरवंसोहंपश्यामि।अयंदेवोगच्छति।नाहंगमिष्यामीत्यादय:कल्पना:क्षीणाभवंतीत्यर्थ:॥९॥ ॥नि
रस्तसंकल्पस्यस्वरूपमाह।द्वाभ्यां।नविक्षेपइति।उपशांतविकल्पस्ययोगिन:विक्षेपोव्यग्रतानाएकाग्र्यादिकमपिनेत्यर्थ:॥१०॥ ॥
स्वराज्येसतिस्वाराज्येस्वर्गराज्येभैक्ष्यपरतोवापराधीनवृत्तौलाभालाभेजनेजनसमूहेविजनेवनेचविशेषोयोगिनोनास्ति।की
दृशस्यविकल्परहितस्वभावस्येत्यर्थ:॥११॥ ॥क्वधर्मइति।इदंकृतमिदंनकृतमित्यादिद्वंद्वैर्विमुक्तस्ययोगिन:धर्मार्थकामादिवैदि
तामोक्षोपायभूतोविकल्पश्चनभवति।तन्मूलभूताऽविद्याकामसंकल्पादीनांविनाशादित्यर्थ:॥१२॥ ॥श्रीराम॥

अ॰ ८१
॥१९॥
कथं तर्हि जीवन्मुक्तस्य क्रियेत्याशंक्य जीवनादृष्टवशादेवेत्याह कृत्यमिति। जीवन्मुक्तस्य योगिनः संकल्पवशात् किमपि कृत्यं नास्ति। त
था हृदि मनसि कापि रंजना कोपि अनुरागो नास्ति। तद्धेतुभूताया विद्याया अभावात्। तथापि अस्य कृत्यं यथा जीवनं जीवनादृष्टम
नतिक्रम्य भवतीत्यर्थः॥२३॥ क्व मोह इति। संकल्पसीमायामात्मबोधे विश्रांतस्य मोहादिकं क्व भवति। किं कारणमाश्रित्य भ
वति न किमपि कारणमाश्रित्य भवति आत्मबुध्याकारेणोपमर्दादित्यर्थः॥२४॥ ॥येनेति। येनेदं विश्वं घटपटादि दृष्टं स नर
हितत्संस्कारः करोति तन्मरादिकं नास्तीति करोतु येन नास्तीति जानातु यः पश्यन्नपि न पश्यति निर्वासनः स किं कुरुते यदृश्य
कं संस्कारापि नास्ति। तस्य कर्तुमशक्यत्वादित्यर्थः॥१५॥ येनेति। येन परं व्यतिरिक्तं ब्रह्म दृष्टं स अहं ब्रह्मेति चिंतयेत्। यस्तु द्विती
यं न पश्यति। स निश्चिन्तः सर्वचिंतारहितः सन् किं चिंतयति न किमपि चिंतयति। अद्वितीयात्मानुभववशात् निश्चलचिंतनमपि

कृत्यं किमपि नैवास्ति न कापि हृदि रंजना॥ यथा जीवनमेवेह जीवन्मुक्तस्य योगिनः॥२३॥ ॥क्व मोहः क्व च वा विश्वं क्व त
ध्यानं क्व मुक्तता॥ सर्वसंकल्पसीमायां विश्रान्तस्य महात्मनः॥१४॥ ॥येन विश्वमिदं दृष्टं स नास्तीति करोतु वै॥ नि
र्वासनः किं कुरुते पश्यन्नपि न पश्यति॥१५॥ ॥येन दृष्टं परं ब्रह्म सोहं ब्रह्मेति चिंतयेत्॥ किं चिंतयति निश्चिंतो द्विती
यं यो न पश्यति॥१६॥ ॥दृष्टो येनात्मविक्षेपो निरोधं कुरुते त्वसौ॥ उदारस्तु न विक्षिप्तः साध्याभावात्करोति किं
॥१७॥ ॥धीरो लोकविपर्यस्तो वर्तमानोपि लोकवत्॥ न समाधिं न विक्षेपं न लेपं स्वस्य पश्यति॥१८॥ ॥श्री॥

नास्तीत्यर्थः॥१६॥ ज्ञानिनि निश्चिंते निरोधोपि नास्तीत्याह दृष्ट इति। येन आत्मविक्षेपश्चित्तादिभ्रमो दृष्टः असौ पुरुषश्चित्तनिरो
धं कुरुते विक्षेपपरिहारार्थं। उदारः सर्वत्राद्वितीयात्मदर्श्यपि तु विक्षिप्त एव नास्ति स विक्षेपपरिहारलक्षणस्य साध्यलोकविपर्यस्तः।
लोकेषु विक्षेपरहितः भावात् किं कुरुते कथं निरोधं कुरुते इत्यर्थः॥१७॥ ॥इदमेव विवृणोति। धीर इति। धीरः अद्वितीयात्मविश्रांतः
लोकविपर्यस्तः लोकेषु विक्षेपरहितः प्रारब्धवशात् लोकवत् वर्तमानोपि बाधितानुवृत्त्या व्यवहारपरोपि सन् अयं समाधिरयं ॥१९॥
विक्षेपस्तथायं विक्षेपकृतो लेप आत्मन इत्यादिकं न पश्यति चिन्मात्रदर्शितत्वात्॥१८॥ ॥श्री राम॥

भावाभावेति। यो बुधस्तृप्तः स्वात्मानुभववत्तृप्तः अत एव भावाभावस्फूर्तिविहीनः अत एव निर्वासनः तेन लोकदृष्ट्या कुर्वतापि किंचिन्नैव कृतं स्या
॥१९॥ त्। अकर्तात्मज्ञानेन कर्तृत्वाध्यासबाधादित्यर्थः॥ १९॥ इदमेव विशदयति। प्रवृत्ताविति। धीरस्यात्मविश्रान्तस्य प्रवृत्तौ वा निवृत्तौ वा दुर्ग्रहः कर्तृत्वा
भिमानो नास्ति। कीदृशस्य धीरस्य प्रारब्धवशाद्यदा यत्प्रवृत्तं वा निवृत्तं वा कर्तुमायाति तत्सुखमनायासेनैव तथा कृत्वा तिष्ठतः अ
तः कर्तृत्वाभिमानाभावात् ज्ञानिनीतत्कृतमेवेत्यर्थः॥२०॥ ननु ज्ञानी चिन्निर्वासनः स्तर्हि किं नवा प्रयुक्तः कर्म करोतीत्याशंक्याह। निर्वासनाइति
निर्वासनः अत एव निरालंबः कर्तव्याकर्तव्यानुसंधानरहितः अत एव स्वच्छंदः रागद्वेषानधीनः यतो मुक्तबंधनः बंधहेतुज्ञानशून्यः। ज्ञानी संस्का
रवातेन क्षिप्तः प्रारब्धपवनेन प्रेरितः सन् शुष्कपर्णवत् चेष्टते॥२१॥ ॥संसारसंकल्पादिशून्यः स तु सर्वदा संतुष्ट एवेत्याह। असंसारस्येति।
न विद्यते संसारहेतुः संकल्पो यस्य तस्य असंसारस्य हर्षादिकं क्वापि कर्मयोगेन जायते अतः ऊर्मिरहितत्वान्नित्यं शीतलमना विदेहमुक्त
भावाभावविहीनो यस्तृप्तो निर्वासनो बुधः॥ नैव किंचित्कृतं तेन लोकदृष्ट्या विकुर्वता॥१९॥ ॥प्रवृत्तौ वा निवृत्तौ वा नैव धीरस्य दु
र्ग्रहः॥ यदा यत्कर्तुमायाति तत्कृत्वा तिष्ठते सुखं॥२०॥ ॥निर्वासनो निरालंबः स्वच्छंदो मुक्तबंधनः॥ क्षिप्तः संस्कारवातेन चेष्टते शु
ष्कपर्णवत्॥२१॥ ॥असंस्कारस्य तु क्वापि न हर्षो न विषादता॥ स शीतलमना नित्यं विदेह इव राजते॥२२॥ ॥कुत्रापि न जिहा
सास्ति नाशो वापि न कुत्रचित्॥ आत्मारामस्य धीरस्य शीतलाच्छतरात्मनः॥२३॥ ॥प्रकृत्या शून्यचित्तस्य कुर्वतोऽस्य
दृच्छया॥ प्राकृतस्येव धीरस्य न मानो नावमानिता॥२४॥ ॥कृतं देहेन कर्मेदं न मया शुद्धरूपिणा॥ इति चिंतानुरोधी यः कुर्वन्नपि करो
ति न॥२५॥
इव राजते षड्ऊर्मिरहितः शिव इति स्मृतेः॥२२॥ ॥कुत्रापीति। आत्मारामस्य अत एव धीरस्य निश्चलचित्तस्य अत एव शीतलः स्वच्छतरः निर्म
लतर आत्मा मनो यस्य तस्य शीतलाच्छतरात्मनः ज्ञानिनः कुत्रापि जिहासा त्यागेच्छा नास्ति। उपादित्सापि नास्ति। रागद्वेषाभावात्। नाशो
पि अनर्थोपि कुत्रचिन्नास्ति। अनर्थहेतोरज्ञानस्याभावादित्यर्थः॥२३॥ ॥प्रकृत्येति। प्रकृत्या स्वभावेन शून्यं विकाररहितं चित्तं यस्य तस्य धीर
स्य आत्मविश्रान्तस्य प्राकृतस्येव अज्ञानिन एव। यदृच्छया प्रारब्धवशात् कुर्वतः अस्य विदुषः मानावमानं नास्तीत्यर्थः॥२४॥ कृतं देहेनेति। इ
ति चिंतां अनुरुध्यतो निरंतरं श्रयति स कुर्वन्नपि न करोति कर्तृत्वाभिमानादित्यर्थः॥२५॥ ॥श्री॥ ॥श्री॥ ॥रामायनमः॥ ॥ ॥

अतद्वादीतिजीवन्मुक्तःअतद्वादीवअहमिदंकरिष्यामीत्यवदन्नेवकार्यंकुरुतेप्रारब्धवशाद्वदन्नपिबालिशोमूर्खोनभवेत्अंतर्ज्ञानित
त्वात्अतएवसंसरन्नपिसंसारव्यवहारंकुर्वन्नपिआंतरसुखीअतएवश्रीमान्प्रसन्नतयाशोभावान्अतएवशोभतेदीप्यतेस्वप्रकाश
इत्यर्थः॥२६॥ ॥नानेति॥नानाविचारात्द्वैताद्वैतविचारात्सुश्रांतःखिन्नःनिर्वृतोपरतोधीरोज्ञानीअतएवआत्मन्येवविश्रांतिमागतःअतएवनक
ल्पतेसंकल्पादिकंमनोव्यापारंनकरोति।नजानातिबुद्धिव्यापारंनकरोति।नशृणोतिनपश्यति।इंद्रियमात्रव्यापारंनकरोतिते
कर्तृत्वादिमानाभावादित्यर्थः॥२७॥ ॥असमाधेरिति॥ज्ञानीमुमुक्षुर्भिन्नइतिअसमाधेःसमाधेरकारणात्तथाइतरोबद्धोनअविक्षेपात्।
द्वैतभ्रमाभावादित्यर्थः।कीदृशःसन्हिज्ञानीत्याशंक्याहनिश्चित्येतिइदंसर्वंकल्पितमिति।एवमेवनिश्चित्यपश्चात्बाधितानुवृत्त्यापश्यन्नपिम

अतद्वादीवकुरुतेनभवेदपिबालिशः॥जीवन्मुक्तःसुखीश्रीमान्संसरन्नपिशोभते॥२६॥ ॥नानाविचारसुश्रांतोधीरोविश्रांतिमा
गतः॥नकल्पतेनजानातिनशृणोतिनपश्यति॥२७॥ ॥असमाधेरविक्षेपान्नमुमुक्षुर्नचेतरः॥निश्चित्यकल्पितंपश्यन्ब्रह्मैवा
स्तेमहाशयः॥२८॥ ॥यस्यांतःस्यादहंकारोनकरोतिकरोतिसः॥निरहंकारधीरेणनकिंचिदकृतंकृतं॥२९॥ ॥नोद्विग्नंनचसं
तुष्टमकर्तृस्पंदवर्जितं॥निराशंगतसंदेहंचित्तंमुक्तस्यराजते॥३०॥ ॥निर्ध्यातुंचेष्टितुंवापियच्चित्तंनप्रवर्तते॥निर्निमित्तमिदंकिं
तुनिर्ध्यायतिविचेष्टते॥३१॥

हाशयोनिर्विकारचित्तःअतएवब्रह्मैवआस्ते॥२८॥ ॥ननुसंसारंपश्यंश्चेत्कथंब्रह्मैवेत्याशंक्याहंकाराभावादित्याह।यस्येति।यस्यांतःकर
णेअहंकाराध्यासःस्यात्सलोकदृष्ट्याकृतंतथापिस्वदृष्ट्यानकिंचिदपिकृतंकर्तृत्वाध्यासाभावादित्यर्थः॥२९॥मुक्तचित्तंवर्णयतिद्वाभ्यांनोद्वि
ग्नमिति।मुक्तस्यचित्तंराजतेकेवलप्रकाशरूपमेवयतोनोद्विग्नंउद्वेगहेतोर्द्वेषस्याभावात्नचसंतुष्टंसंतोषहेत्वनुरागाभावात्।तथाकर्तृस्पंद
नवर्जितंसंकल्पविकल्पशून्यंअतएवनिराशं।गतःसंदेहोयस्मात्तत्गतःसंदेहःदेहहेतोरज्ञानस्यनष्टत्वादित्यर्थः॥३०॥ ॥निर्ध्यातुमिति
यस्यज्ञानिनश्चित्तंनिर्ध्यातुंचेष्टितंचेष्टांकर्तुंवापिनप्रवर्तते।नसंकल्पयति।किंतुइदंज्ञानचित्तंनिर्निमित्तंसंकल्परहितमेवसत्निर्ध्यायति।
निश्चलस्वरूपेतिष्ठति।तथाचेष्टते।विविधाश्चेष्टांकरोतीत्यर्थः॥३१॥ ॥

ननुत्वन्मपिसंकल्पादिकंकरोतिकर्तृत्वाध्यासात्निरहंकारेणअतएवधीरेणकर्तृत्वाध्यासरहितेनयद्यपिलोकदृष्ट्या×५

नान्यस्यज्ञानिनो विशेषवदन्येवज्ञानिनो विरलत्वमाह ॥ तत्त्वमिति ॥ मंदः अज्ञानी यथार्थं तत्त्वं तत्त्वपदार्थाभेदं श्रुत्वाकर्ण्य असंभावनाविपरीतभा
वनाभ्यां मूढतां अविवेकतां प्राप्नोति । अथवा आत्मार्थसाक्षात्कारात् संकोचं चित्तसमाधिं आयाति । कोपि सहस्रेषु कश्चिदन्तरसंमूढोपि बाह्यगत्या
मूढवत् बाह्यव्यवहारकृत् भवति ॥ ३२ ॥ ॥ अथवायाति संकोचमित्यनेनोक्तैकाग्रता निरोधौ दूषयति । एकाग्रतेति । एकाग्रता एकलक्ष्य
एचित्तता । अथवा निरोध चित्तविलयो मूढैरमुमुक्षुभिः आत्मसाक्षात्कारे विपरीतभावनानिरासार्थं भृशम् अत्यर्थं अभ्यस्यते । सुप्तवत् सुषुप्तव
त् देहात्मधीराः कृत्यं नेन पदे स्वस्वरूपे स्थिताः । धीराः ज्ञानिनस्तु प्राप्तं कृत्यं किमपि कृत्यं न पश्यन्ति । अद्वैतानन्दात्मसाक्षात्कारिणो चानानंदरा
त्रमस्य कुरूपास्तत्वादित्यर्थः ॥ ३३ ॥ ॥ निरोधस्याकिंचित्करतामाह । अप्रयत्नादिति । मूढः पुरुषः अप्रयत्नात् चित्तनिरोधात् प्रयत्नात् क
र्मानुष्ठानाद्वारा निर्वृतिं परमसुखं न प्राप्नोति । आनन्दहेतोरात्मानन्दानुभवाभावादित्यर्थः । प्राज्ञस्तु समाधिं वा कर्म वाप्यकुर्वन् तत्त्व

तत्त्वं यथार्थमाकर्ण्य मंदः प्राप्नोति मूढतां । अथवायाति संकोचं अमूढः कोपि मूढवत् ॥ ३२ ॥ ॥ एकाग्रता निरो
धो वा मूढैरभ्यस्यते भृशं । धीराः कृत्यं न पश्यन्ति सुप्तवत्स्वपदे स्थिताः ॥ ३३ ॥ ॥ अप्रयत्ना प्रयत्नाद्वा मूढो
नाप्नोति निर्वृतिं । तत्त्वनिश्चयमात्रेण प्राज्ञो भवति निर्वृतः ॥ ३४ ॥ ॥ शुद्धं बुद्धं प्रियं पूर्णं निःप्रपंचं निरामयं ॥ आत्मा
नं तं न जानंति तत्राभ्यासपरा जडाः ॥ ३५ ॥ ॥ नाप्नोति कर्मणा मोक्षं विमूढोभ्यासरूपिणा ॥ धन्यो विज्ञानमात्रेण
मुक्तस्तिष्ठत्यविक्रियः ॥ ३६ ॥ ॥ मूढो नाप्नोति तद्ब्रह्म यतो भवितुमिच्छति ॥ अनिच्छन्नपि धीरो हि परब्रह्मस्वरूपभाक् ॥ ३७ ॥ ॥

निश्चयमात्रेण कृतार्थो भवति । दुःखहेतोरज्ञानस्य ज्ञानदग्धत्वादित्यर्थः ॥ ३४ ॥ ननु योगाभ्यासं विना आत्मानुभवो भविष्यति । तत्राह शुद्ध
मिति । तत्र जगति अभ्यासपरा जडा अज्ञानिन आत्मानं न जानंति । कीदृशं शुद्धं मायामलातीतं अत एव बुद्धं स्वप्रकाशं प्रियं सुखरूपं पूर्णं
यतो निष्प्रपंचं अत एव निरामयं दुःखसंबंधरहितं ॥ ३५ ॥ ॥ इदमेव विवृणोति । नाप्नोतीति । विमूढो नात्मज्ञः अभ्यासरूपिणा योगाभ्या
सात्मकेन कर्मणा मोक्षं नाप्नोति । न कर्मणा न प्रजया धनेनेति श्रुतेः । धन्यो भाग्यवान् धीरो ज्ञानमात्रेणाविक्रियो निरस्ताखिलाक
मकर्मा अत एव मुक्तस्तिष्ठति ॥ ३६ ॥ ॥ मुमुक्षुरपि मूढो ब्रह्म नाप्नोतीति निश्चित्याह मूढ इति । मूढः अज्ञानी यतः चित्तनिरोधाद्ब्रह्म
भवितुमिच्छति ततो ब्रह्म नाप्नोति हि निश्चितं । धीरो ज्ञानी अनिच्छन्नपि मोक्षमनिच्छन्नपि परब्रह्मस्वरूपभाक् । व्यचक्षायका

॥ अष्टावक्रटीका [illegible] ॥

एतदेवस्पष्टयति निराधारेति। मूढा अज्ञानिनस्तु निराधारा ग्रहव्यग्राः केवलेन चित्तनिरोधेनैवाहं मोक्ष्यामीति निष्कारणदुराग्रहव्यग्राः प्रत्युत संसारपोषकाः संसारनिवर्तकज्ञानपराङ्मुखत्वात्। बुधैर्ज्ञानिभिः अनर्थमूलस्य एतस्य संसारस्य मूलच्छेदः कृतः संसारमूलभूतस्याज्ञानस्य ज्ञानेन निवृत्तत्वादित्यर्थः॥३८॥ ॥नित्राप्नोतीति। मूढ अज्ञानी यत एव चित्तनिरोधादेः शान्तिमिच्छति ततः शान्तिं न लभते। धीरो विवेकी तत्त्वं विनिश्चित्य शान्तिमनिच्छन्नपि स्वभावादेव सर्वदा शान्तमनसो भवति चित्तो विकारहेतोरज्ञानस्य निवृत्तत्वादित्यर्थः॥३९॥ ॥कात्मन इति। एतद्दृष्टं यस्य दृष्टं तदेव लंबते। दृश्यविषयीकरोति तस्य आत्मनो दर्शनं क्व न क्वापीत्यर्थः। धीराः ज्ञानिनः तत्तत्तिमिरप्रदीपनाशादिकं दृश्यपदार्थं न पश्यन्ति किंतु चिद्रूपमात्मानं पश्यन्ति

निराधाराग्रहव्यग्रा मूढाः संसारपोषकाः। एतस्यानर्थमूलस्य मूलच्छेदः कृतो बुधैः॥३८॥ ॥न शान्तिं लभते मूढो यतः शमितुमिच्छति। धीरस्तत्त्वं विनिश्चित्य सर्वदा शान्तमानसः॥३९॥ ॥क्वात्मनो दर्शनं तस्य यद्दृष्टमवलंबते। धीरास्तं तं न पश्यन्ति पश्यन्त्यात्मानमव्ययम्॥४०॥ ॥क्व निरोधो विमूढस्य यो निर्बंधं करोति वै। स्वारामस्यैव धीरस्य सर्वदासावकृत्रिमः॥४१॥ ॥भावस्य भावकः कश्चिन्न किंचिद्भावकोऽपरः। उभयाभावकः कश्चिदेवमेव निराकुलः॥४२॥ ॥शुद्धमद्वयमात्मानं भावयन्ति कुबुद्धयः। न तु जानन्ति संमोहाद्यावज्जीवमनिर्वृताः॥४३॥

यन्ति॥४०॥ ॥क्वेति। अज्ञानी यश्चित्तनिरोधे निर्बंधं करोति तस्य विमूढस्य क्व चित्तनिरोधः न क्वापि अज्ञानिनो समाध्यपगमे पुनश्चित्तप्रसरात्। स्वारामस्य आत्मारामस्यैव अत एव निश्चलचित्तस्य सर्वदासौ चित्तनिरोधः अकृत्रिमः स्वाभाविकः सर्वदा स्वात्मानुभवशालित्वात्॥४१॥ ॥भावस्येति। कश्चित्तार्किकादिः भावस्य भावकः भावरूपपरमार्थः सत्प्रपंच इति। भाव इति मन्यते भावकः। अपरः शून्यवादी बौद्धः न किंचिदस्तीति भाव इति मन्यते इति न किंचिद्भावकः। कश्चित्सहस्रेष्वेकः कश्चिदात्मानुभवशाली उभयाभावकः सन् एवमेव उभयाभावनेनैव निराकुलः स्वच्छचित्त आस्ते इत्यर्थः॥ ॥न किंचिदपि चिंतयेति। भगवद्वचने सिद्धान्तमभिप्रेत्याह। शुद्धमिति। कुबुद्धयो मूढ एव शुद्धं निर्मलं अद्वयं द्वैतवर्जितं आत्मानं अनुतनशीलं व्यापकं भावयन्ति चिंतयन्ति न तु जानन्ति साक्षात्कुर्वन्ति। कुतः संमोहात्॥ निर्मलत्वस्य कल्पितामलस्य सापेक्षत्वात् अद्वयस्य कल्पितद्वैतसापेक्षत्वात् आत्मत्वस्य कल्पितानात्मसापेक्षत्वा

त्सापेक्षरूपचिंतने न तु मोहान्निवृत्ताः। एतेन ज्ञानान्तिजतत्पश्यावज्जीवमनिर्वृताः परमसंतोषरहिताः संतोषस्य ज्ञानैकलभ्यत्वादित्यर्थः॥४३॥

इदमेव विशदयति मुमुक्षोरिति। मुमुक्षोरनधिगतात्मसाक्षात्कारस्य बुद्धिः सविशेषालंबनमंतरेण न विद्यते। साक्षात्काराभावात्। मुक्तस्य जीव
न्मुक्तस्य। अत एव मुक्तावपि निष्कामा बुद्धिः सर्वदा निरालंबैव निर्विशेषा आत्मानुभवरूपैव। सविशेषादिपरित्यागएवात्मानुभवः॥४४॥ ॥
निरोधेपि विषयेस्फूर्तिंच कि[illegible]रेवानुष्ठीयते न तु विज्ञैरित्याह। विषयेति। विषयद्वीपिनो विषयव्याघ्रान्वीक्ष्य शार्दूलद्वीपिनौ व्याघ्रइत्यमरः। भी
ताः शरणार्थिनः स्वात्मरक्षार्थिनो मूढाएव निरोधसिद्धय एकलक्ष्यवृत्तिसिद्धये वा झटिति शीघ्रं कोटकंदरांतः प्रदेशं विशंति। न तु ज्ञानिन इत्य
र्थः॥४५॥ ॥वासनात्यागएव विषयभयनिवृत्तिहेतुरित्याह। निर्वासनेति। निर्वासनो यः पुरुषस्तल्लक्षणं हरिं सिंहं दृष्ट्वा विषयदंतिनो नशक्ताः
संतः तूष्णीं मौनं यथा स्यात्तथा पलायंते। कृतचाटवः कृतप्रियवचना इव तं निर्वासनं ईश्वराकृष्टाः सेवंत इत्यर्थः॥४६॥ ॥नमुक्तीरिति। निःशं

विषयद्वीपिनो वीक्ष्य चकिताः शरणार्थिनः॥ विशंति झटिति क्रोडं निरोधैकाग्र्यसिद्धये॥४५॥ ॥मुमुक्षोर्बुद्धिरालंबमंतरेण न
विद्यते॥ निरालंबैव निष्कामा बुद्धिर्मुक्तस्य सर्वदा॥४४॥ ॥निर्वासनं हरिं दृष्ट्वा तूष्णीं विषयदंतिनः॥ पलायंते न शक्तास्ते
सेवंते कृतचाटवः॥४६॥ ॥न मुक्तिकारिकां धत्ते निःशंको मुक्तमानसः॥ पश्यन् शृण्वन् स्पृशन् जिघ्रन्नश्नन्नास्ते यथासुखं।
॥४७॥ वस्तुश्रवणमात्रेण शुद्धबुद्धिर्निराकुलः॥ नैवाचारमनाचारमौदास्यं वा प्रपश्यति॥४८॥ ॥यदा यत्कर्तुमायाति तद
दा तत्कुरुते ऋजुः॥ शुभं वाप्यशुभं वापि तस्य चेष्टा हि बालवत्॥४९॥ ॥कोगतसंशयः अत एव युक्तमानसो निश्चलमानसः। ज्ञानी मुक्तिका

रिकां यमनियमादिक्रियाः आग्रहान्न धत्ते। किंतर्हि कर्तृत्वाध्यासरहितत्वात्। यथासुखं आत्मसुखमनतिक्रम्य लोकदृष्ट्या ईक्षणादिक्रिया
कुर्वन्नास्ते इत्यर्थः॥४७॥ ॥वस्त्विति। वस्तुनश्चिदात्मनः श्रवणमात्रेण जातया शुद्धबुद्धिः अखंडात्मसाक्षात्कारस्ततो निराकुलः स्वस्वरू
पस्थः पुरुषः आचारं क्रियानुष्ठानं अनाचारं नैष्कर्म्यं तदुभयत्रापि ताटस्थ्यं वा एतत्त्रयमपि नैव प्रपश्यति आत्मस्थत्वादित्यर्थः॥४८॥
यदेति। यदा यच्छुभं नैष्कर्म्यं वा अशुभं अकर्म वा कर्तुमायाति मल्लोकसंग्रहदृष्ट्या प्रारब्धवशात्कुरुते ऋजुराग्रहरहितः हि यतः कारणादस्य
चेष्टा बालवत् प्रारब्धमात्रायत्ता रागद्वेषानधीना॥४९॥ स्वातंत्र्यादिति। स्वातंत्र्याद्रागद्वेषानधीनत्वात्सुखं मनःप्रसादमाप्नोति। यतः स्वातंत्र्यात्परं
ज्ञानमाप्नोति तथा स्वातंत्र्यान्निर्वृतिं नित्यसुखं गच्छेत् प्राप्नुयात्। अत एव स्वातंत्र्यात्परमं पदं स्वरूपावस्थितिं गच्छेत्॥५०॥ ॥

७४ स्वातंत्र्यात्सुखमाप्नोति स्वातंत्र्याल्लभते परं॥ स्वातंत्र्यान्निर्वृतिं गच्छेत्स्वातंत्र्यात्परमं पदं॥५०॥ ४७॥

अकर्तृत्वमिति। यदा स्वात्मनः अकर्तृत्वं मन्यते तदा समस्ताश्चित्तवृत्तयः क्षीणा भवन्त्येव अमुकं कर्माहं करिष्यामि। अमुकं मे भोग्यं भविष्य
त्यादिर्वृत्तयः न उदयंते जन्यानामन्यासामपि चित्तवृत्तीनामनुदयादित्यर्थः॥५१॥ ॥उच्छृंखलेति। धीरस्य वीतस्पृहस्य अकृतकाअ
कृत्रिमा उच्छृंखलापि शांतिरहितापि स्थितिः शोभते। सस्पृहचित्तस्य मूढस्य तु कृत्रिमा शांतिर्न शोभत इत्यर्थः। निरस्तकल्पना ज्ञानि
नानुभोगतद्धंत्योरप्यनाग्रह इत्याह। विलसंतीति। निरस्तकल्पना धीरा ज्ञानिनः कदाचित् प्रारब्धवशान्महाभोगैर्विलसंति क्री
डंति कदाचित्प्रारब्धवशात् गिरिगह्वरान् पर्वतवनानि विशंति। कीदृशाः अबुद्धा आसक्तिरहिताः अतएव मुक्तबुद्धयः कर्तृत्वाध्यासरहितबुद्धय इ
त्यर्थः॥५३॥ ॥श्रोत्रियमिति। धीरस्य ज्ञानिनः श्रोत्रियं देवतां तीर्थं पूजनेसति हृदि कापि वासना धर्मार्थकामवासना न जायते अंगनाभू
पतिं प्रियं पुत्रादिकं च दृष्ट्वा कापि काम्यपदार्थवासना न जायते। सर्वत्र समबुद्धित्वादित्यर्थः॥५४॥ ॥भृत्यैरिति। भृत्यादिभिर्विहस्य

अकर्तृत्वमभोग्यत्वं स्वात्मनो मन्यते यदा॥ तदा क्षीणा भवंत्येव समस्ताश्चित्तवृत्तयः॥५१॥ ॥उच्छृंखलाप्यकृतका स्थिति
धीरस्य राजते॥ न तु सस्पृहचित्तस्य शांतिर्मूढस्य कृत्रिमा॥५२॥ ॥विलसंति महाभोगैर्विशंति गिरिगह्वरान्॥ निरस्तकल्प
ना धीरा अबद्धा मुक्तबुद्धयः॥५३॥ ॥श्रोत्रियं देवतां तीर्थमंगनां भूपतिं प्रियं। दृष्ट्वा संपूज्य धीरस्य न कापि हृदि वासना।
॥५४॥ ॥भृत्यैः पुत्रैः कलत्रैश्च दुहित्रैश्चापि गोत्रजैः। विहस्य धिक्कृतो योगी न याति विकृतिं मनाक्॥५५॥ संतुष्टोपि न संतुष्टः खि
न्नोपि न च खिद्यते तस्याश्चर्यदशां तां तां तादृशा एव जानते॥५६॥ कर्तव्यतैव संसारो न तां पश्यंति सूरयः॥ शून्याकारा निराकारा
निर्विकारा निरामयाः॥५७॥ ॥

उपहस्य धिक्कृतस्तिरस्कृतो योगी मनाक् किंचिदपि विकृतिं चित्तक्षोभं न याति। रागद्वेषहेतोर्मोहस्याभावादित्यर्थः॥५५॥ संतुष्ट इ
ति। लोकदृष्ट्या संतोषादियुक्तोपि वस्तुतस्तद्रहितस्तस्य ज्ञानिनस्तां तामाश्चर्यदशां तादृशा एव ज्ञानिन एव जानते॥५६॥ कर्तव्यतैवेति।
कर्तव्यतैव ममेदं कर्तव्यमिति। कार्यसंकल्प एव संसारस्तद्धेतुत्वात्। सूरयो ज्ञानिनस्तां कर्तव्यतां न पश्यंति। न कल्पयंति। संकल्पमा
त्ररहितत्वात्। कीदृशाः सूरयः शून्ये सर्वकार्यक्षमे तथा वर्तमान घटाद्याकारे तथा निराकारे अव्याकृते निर्विकारसमाः समात्मदर्शि
नः अतएव निरामयाः संकल्पोस्तवरहिता इत्यर्थः॥५७॥ ॥ ॥श्री॥ ॥ ॥२२॥

अकुर्वन्निति। अकुर्वन्नपि मूढधीः सर्वत्र शून्याकारनिराकारेषु संक्षोभात्संकल्पात् व्यग्रो भवति। लोकदृष्ट्या कृत्यानि कुर्वन्नपि कुशलो विद्वान्
हि निश्चितं निराकुलं निश्चिंतचित्तः आत्मारामतात्॥५८॥ ॥सुखमिति॥ प्राक्तनवशात् व्यवहारेपि जायमाने शांतधीरात्मनिष्ठाबुद्धिर्विद्वान्
आत्मसुखमनतिक्रम्यैव आस्ते उपविशति। शेते आगच्छति गच्छति वक्ति भुंक्ते सर्वेंद्रियव्यापारं कुरुत इत्यर्थः॥५९॥ ॥ननु ज्ञानिनो व्यवहारेषु
कथं न खेद इत्यत आह॥ स्वभावादिति॥ व्यवहारिणोपि यस्य ज्ञानिनः लोकवत् प्राकृतजनवत् आर्तिः खेदो न जायते। कुतः स्वभावात् साक्षा
त्कृतनैरस्य स्वभावात् सामर्थ्यादित्यर्थः। स गतक्लेशो ज्ञानान्महाह्रद इवाक्षोभ्यो निर्विकारः सुशोभते॥६०॥ ॥निवृत्तिरिति॥ लोकदृष्ट्या
प्रारब्धवशात् प्रतीयमानापि मूढस्य बाह्येंद्रियव्यापाराणां निवृत्तिः प्रवृत्तिस्वरूपैव जायते अहंकारादीनामनिवृत्तत्वात्। धीरस्य ज्ञानि

अकुर्वन्नपि संक्षोभाद्व्यग्रः सर्वत्र मूढधीः। कुर्वन्नपि तु कृत्यानि कुशलो हि निराकुलः॥५८॥ ॥सुखमास्ते सुखं शेते सुखमा
याति याति च। सुखं वक्ति सुखं भुंक्ते व्यवहारेपि शांतधीः॥५९॥ ॥स्वभावाद्यस्य नैवार्तिर्लोकवद्व्यवहारिणः। महाह्रद इवाक्षो
भ्यो गतक्लेशः सुशोभते॥६०॥ ॥निवृत्तिरपि मूढस्य प्रवृत्तिरुपजायते। प्रवृत्तिरपि धीरस्य निवृत्तिफलभागिनी॥६१॥ परिग्र
हेषु वैराग्यं प्रायो मूढस्य दृश्यते। देहे विगलिताशस्य क्व रागः क्व विरागता॥६२॥ भावनाभावनासक्ता दृष्टिर्मूढस्य सर्वदा।
भाव्यभावनया सा तु स्वस्थस्यादृष्टिरूपिणी॥६३॥ सर्वारंभेषु निष्कामो यश्चरेद्बालवन्मुनिः। न लेपस्तस्य शुद्धस्य क्रियमाणेपि कर्मणि॥

नः लोकदृष्ट्या प्रारब्धवशात् प्रतीयमानापि प्रवृत्तिरपि निवृत्तिफलभागिनी मुक्तिपर्यवसायिनी स्यात् अहं करोमीत्यभिमानाभावादित्यर्थः॥६१॥
परिग्रहेष्विति। मूढस्य देहाभिमानिनस्तत्संबंधितया परिग्रहेषु धनवेश्मादिषु प्रायो बाहुल्येन वैराग्यं दृश्यते देहे विगलिताशस्य संबंधिनी कु
त्र गृहादौ रागः स्यात् क्व शत्रुव्याघ्रादौ विरागः स्यात् देहे रागविरागयोरभावेन तत्संबंधिषु रागविरागयोर्वक्तुमशक्यत्वात्॥६२॥ ॥भावनेति॥
मूढस्य दृष्टिः सर्वदा भावनायामभावनायां च आसक्ता अहं भावनां करोमि यद्वा अहं भावनां करोमीत्यहंकारात्। स्वस्थस्यात्मनिष्ठस्य तु सा दृष्टिः
भाव्यभावनया दृश्यविवर्जितया उपलक्षितापि अदृष्टिरूपिणी दृश्यदर्शनरहितरूपैव स्यात् अहं करोमीत्यभिमानाभावादित्यर्थः॥६३॥ ननु दृश्यभाव
नक्रियमाणेपि न तद्दृष्टिः कथं हृदयानालंबिनीत्यात आत्मनिष्कामत्वादित्याह सर्वारंभेष्विति। यो बालवत् निष्कामः सन् प्राक्तनवशात्सर्वारंभेष्वर

[illegible] ॥६४॥

एवंविधोऽतिधन्य इत्याह। स एवेति। स आत्मज्ञ एव धन्यो नान्यः। यः सर्वभावेषु समात्मबुद्धिः अत एव निस्तर्षमानसोऽपि तृष्णाविवर्जितो भवति। किं
कुर्वन्। पश्यन् शृण्वन् स्पृशन् जिघ्रन् अश्नन्॥६५॥ ॥तस्यैव धन्यत्वे युक्तिमाह। क्वेति। धीरस्य ज्ञानिनः अत एव सर्वदा विकल्परहितस्य
संसारः प्रपञ्चः क्व। अत एव तत्प्रतिभासश्च क्व। अत एव साध्यः स्वर्गादिः क्व। अत एव साधनं यागादिः क्व च क्व॥६६॥ ॥स जयतीति। स अर्थसंन्यासी दृष्टा
दृष्टप्रयोजनरहितः पूर्णः स्वरसः पूर्णस्वभावो विग्रहः स्वरूपं यस्य स पूर्णस्वरसविग्रहो जयति। सर्वोत्कर्षेण वर्तते। स कः। यस्य अकृत्रिमः
स्वाभाविकः अनवच्छिन्ने पूर्णस्वरूपे समाधिः अनवच्छिन्नसमाधिर्यस्य वर्तते स जयतीत्यर्थः॥६७॥ ॥ज्ञाततत्त्वस्य तु सर्वत्र निराकांक्षत्वमेव मुख्यं
लक्षणमित्याह। बहुनेति। अत्र ज्ञानिनि बहुनोक्तेन लक्षणेन किं प्रयोजनं। ज्ञाततत्त्वो महाशयः भोगमोक्षयोः फलयोर्निराकांक्षी अत एव स
दा सर्वत्र भोगमोक्षसाधनेषु नीरसः निरनुरागः॥६८॥ ॥महदादीति। महदहंकारः पञ्चतन्मात्रा पञ्चमहाभूतभौतिकं जगल्लक्षणं द्वैतं

स एव धन्य आत्मज्ञः सर्वभावेषु यः समः। पश्यञ्छृण्वन्स्पृशञ्जिघ्रन्नश्नन्निस्तर्षमानसः॥६५॥ ॥क्व संसारः क्व चाभासः
क्व साध्यं क्व च साधनं। आकाशस्येव धीरस्य निर्विकल्पस्य सर्वदा॥६६॥ ॥स जयत्यर्थसंन्यासी पूर्णस्वरसविग्रहः। अकृत्रिमो
नवच्छिन्ने समाधिर्यस्य वर्तते॥६७॥ ॥बहुनात्र किमुक्तेन ज्ञाततत्त्वो महाशयः। भोगमोक्षनिराकांक्षी सदा सर्वत्र नीरसः॥६८॥
महदादि जगद्द्वैतं नाममात्रविजृम्भितं। विहाय शुद्धबोधस्य किं कृत्यमवशिष्यते॥६९॥ ॥भ्रमभूतमिदं सर्वं किंचिन्नास्तीति
निश्चयी। अलक्ष्यस्फुरणः शुद्धः स्वभावेनैव शाम्यति॥७०॥ ॥शुद्धस्फुरणरूपस्य दृश्यभावमपश्यतः। क्व विधिः क्व च वैराग्यं क्व त्यागः क्व श

नाममात्रेणैव विजृम्भितं विस्तीर्णतां प्राप्तं ननु वास्तवं। अत एव तत्कल्पनां विहाय स्थितस्य अत एव शुद्धबोधस्य स्वप्रकाशचिन्मात्रस्वरूपस्य किं कृ
त्यमवशिष्यते सच्चिदानन्दाधिगमेनैव कृतकृत्यत्वादिति भावः॥६९॥ ननु तथापि अनर्थशान्त्यर्थं प्रयत्नः कर्तव्य इत्यत आह। भ्रमभूतमिति। अधि
ष्ठानसाक्षात्कारे सति इदं सर्वं भ्रमभूतं भ्रमेणैव कल्पितं अत एव दृष्टं किंचिदपि वास्तवं नास्तीति निश्चयी अलक्ष्यस्फुरणः चिन्मात्रप्रतिभास
वान् अत एव शुद्धः स्वरूपसाक्षात्कारेण बाधितास्तमलत्वात् स्वभावेनैव शाम्यति शान्त्यर्थं ज्ञानातिरिक्तमपेक्ष्यमित्यर्थः॥७०॥ शुद्धेति। शु
द्धस्फुरणरूपस्य स्वप्रकाशचिद्रूपस्य अत एव दृश्याभावे दृश्यपदार्थमपश्यतः क्व कुत्र कर्मणि विधिः। क्व के षु वा विषयेषु वैराग्यं। क्व के
षु पदार्थेषु त्यागः। क्व केभ्यः पदार्थेभ्यः शमोऽपि वा क्वापि दृश्यपदार्थस्यैवास्फुरणादित्यर्थः॥७१॥ ॥श्री॥ ॥

चिद्रूपेण प्रकाशमानस्य बंधादिकं नास्तीत्यर्थः ॥ ननु यद्यपि स्थूलप्रपंचो निराकृतस्तथापि सूक्ष्मायाः प्रकृतेः संस्कारमात्ररूपायाः सुषुप्ताविव
निर्मानायाः कथं निरासः इत्यत आह ॥ स्फुरत इति अपरिच्छिन्नरूपेणाभासमानस्य प्रकृतिसंबंधाभावादसंगोदासीनस्यात्मनः क्व तत्र संबंधः क्व
नु मतेन क्व तत्र वा हर्षः क्व क्व तत्र वा विषादः सर्वस्यापि बंधमोक्षादेः प्रकृतिः प्रयत्नेन प्रकृतिसंबंधाभावादेवेत्यर्थः ॥७२॥ ॥बुद्धीति ॥ बुद्धिरात्मज्ञानेन
व पर्यंतो नाशो यस्य तस्मिन् संसारे मायामात्रं मायासंवलितं चैतन्यं विवर्तते । अतो विकाराहंकारं प्राप्नोति अतो बुधो विद्वान् तादिके शरीरे निर
हंकारस्तत्संबंधिनि कलत्रादौ निर्ममः अत एव निष्कामः अत एव शोभते दीप्यते । कामनाभिरलिप्तो न ॥७३॥ ॥अक्षयमिति ॥ अक्षयमविनाशिनं अ
त एव संतापरहितं आत्मानं पश्यतो मुनेः ॥ क्व विद्या क्व शास्त्राणीत्यर्थः ॥ क्व वा विश्वं क्व वा देहः अहं ममेति वा क्व आत्मातिरिक्तस्य विद्यादिवा
दिस्फुरणादित्यर्थः ॥७४॥ ॥आत्मज्ञस्य द्वैतानर्थनिवृत्तिरित्युक्तं अज्ञस्य तु चित्तनिरोधादीन्यपि कर्माणि कुतर्कशोचप्रायाणीत्याह ॥ निरोधादी

स्फुरतोऽनंतरूपेण प्रकृतिं च न पश्यतः ॥ क्व बंधः क्व च वा मोक्षः क्व हर्षः क्व विषादिता ॥७२॥ ॥बुद्धिपर्यंतसंसारे मायामात्रं विवर्तते । निर्म
मो निरहंकारो निःकामः शोभते बुधः ॥७३॥ ॥अक्षयं गतसंतापमात्मानं पश्यतो मुनेः ॥ क्व विद्या क्व च वा विश्वं क्व देहोहं ममेति वा ॥
निरोधादीनि कर्माणि जहाति जडधीर्यदि ॥ मनोरथान् प्रलापांश्च कर्तुमाप्नोत्यतत्क्षणात् ॥७५॥ मंदः श्रुत्वापि तद्वस्तु न जहाति
विमूढतां ॥ निर्विकल्पो बहिर्यत्नादंतर्विषयलालसः ॥७६॥ ज्ञानाद्गलितकर्मा यो लोकदृष्ट्यापि कर्मकृत् ॥ नाप्नोत्यवसरं कर्तुं वक्तु
मेव न किंचन ॥७७॥ ॥ ॥

नीति ॥ यदि यत्र जडधीः चित्तनिरोधादीनि जहाति तर्हि अतः क्षणात् अस्मादेव क्षणाद् आरभ्य मनोरथान् प्रलापान् लक्षणया सर्वव्यापारान् क
र्तुमाप्नोति प्रवर्तते । तथा च मूढस्य चित्तनिरोधादिकमपि किंचित्करमित्यर्थः ॥७५॥ ॥मूढस्यात्मश्रवणमपि अनर्थकमित्याह ॥ मंद इति ॥ मू
ढो मूर्खस्तत्वं आत्मवस्तु श्रुत्वापि विमूढतां न जहाति मलिनचित्तस्य श्रवणादपि ज्ञानानुदयात् । अत एव मूढः प्रयत्नाद् बहिर्दृष्ट्या निर्विकल्पोपि
अंतर्मनसि विषयलोलुपो भवतीत्यर्थः ॥७६॥ ज्ञानी तु लोकदृष्ट्या कर्म कुर्वाणोऽप्यकर्तैवेत्याह ॥ ज्ञानादिति ॥ यः ज्ञानाद्गलितकर्मा गलितक्रिया
ध्यासः स लोकदृष्ट्या कर्मकृदपि किंचन कर्तुं वक्तुमेव अवसरं नाप्नोति । अहं कर्म करिष्यामीति वक्तुमपि अवसरं नाप्नोति कर्मावसरस्तु दूरा
पास्त इति भावः ॥७७॥ ॥श्रीमहागुरुभ्यो नमः ॥

विद्वांस्तु तमः प्रकाशादिकं न पश्यति तस्मादाह क्वेति। धीरस्य ज्ञानिनः अत एव निर्विकारस्य निरस्तमोहादिविकारस्य तमः क्व न मूले भावे च तन्निरूप्यः
प्रकाशो वा क्व। निरातंकस्य कालादिभयशून्यस्य हानं क्व च न क्व चेत्यर्थः। अनुरागादिशून्यत्वात् किंचन किमपि आदानादिकर्मापि क्व च न क्वापीत्य
र्थः॥७८॥ ॥निर्वाच्यस्वभावस्य धैर्यं क्व विवेकित्वं क्व निरातंकता निर्भयतापि वेत्यर्थः॥७९॥ ॥ज्ञानदृष्ट्यानुस्वर्गनरकमोक्षादिकं किंचिदपि नास्ती
त्यर्थः। न स्वर्ग इति। सुगमः श्लोकः॥८०॥ ॥ज्ञानिनिश्चितं तु प्रार्थनानुतापादिविकाररहितत्वादमृतेनैव परमानंदेनैव पूरितमित्याह नैवेति। ला
भं न प्रार्थयते। अलाभे न सुवर्णादिलाभे नानुशोचति। अत एव धीरस्य चित्तममृतेनैव परमानंदेनैव पूरितं सत् शीतलमाध्यात्मिकादिता
परहितमित्यर्थः॥८१॥ ॥उक्तमप्यमेवार्थं पुनः पुनः भंगीविशेषेण वर्णयति। ज्ञानिदशायाः सर्वोत्कृष्टत्वख्यापनाय। न शांतमिति। निष्कामो ज्ञ

क्व तमः क्व प्रकाशो वा हानं क्व च न किंचन। निर्विकारस्य धीरस्य निरातंकस्य सर्वदा॥७८॥ ॥क्व धैर्यं क्व विवेकित्वं क्व निरातंकतापि
वा अनिर्वाच्यस्वभावस्य निःस्वभावस्य योगिनः॥७९॥ ॥न स्वर्गो नैव नरको जीवन्मुक्तिर्न चैव हि। बहुनात्र किमुक्तेन
योगदृष्ट्या न किंचन॥८०॥ ॥नैव प्रार्थयते लाभं नालाभेनानुशोचति। धीरस्य शीतलं चित्तममृतेनैव पूरितं॥८१॥ ॥
मो न शांतं स्तौति निष्कामो न दुष्टमपि निंदति। समदुःखसुखस्तृप्तः किंचित्कृत्यं न पश्यति॥८२॥ ॥धीरो न द्वेष्टि संसारमात्मानं न
दिदृक्षति। हर्षामर्षविनिर्मुक्तो न मृतो न च जीवति॥८३॥ ॥निःस्नेहः पुत्रदारादौ निःकामो विषयेषु च। निश्चिंतः स्वशरीरेपि
निराशः शोभते बुधः॥८४॥ तुष्टिः सर्वत्र धीरस्य यथापतितवर्तिनः। स्वच्छंदं चरतो देशान् यत्रास्तमितशायिनः॥८५॥ ॥श्री॥

अविद्याकामकर्मरहितो ज्ञानी शांतं शांत्यादिसत्वगुणयुक्तं न स्तौति नापि दुष्टं निंदति तत्र सः समसुखदुःखो भवति। निःकामत्वात् किंचित्कृ
त्यं न पश्यति॥८२॥ ॥धीर इति। धीरो ज्ञानी संसारं न द्वेष्टि असारदर्शित्वात्। दूषितानुसंधानाभावात्तथा आत्मानं न दिदृक्षति आत्मसाक्षात्कार
त्वात् अत एव हर्षामर्षविनिर्मुक्तः सन् तथा जीवनमरणादिरहितः स एकरूपत्वादित्यर्थः॥८३॥ ॥निःस्नेह इति। निराशो बुधः शोभते दीप्यते
कीदृशः पुत्रदारादौ निःस्नेहः प्रीतिरहितः विषयेषु निष्कामः भोगेच्छारहितः स्वशरीरेपि भोजनादिचिंतारहितः॥८४॥ ॥तुष्टिरिति। धीरस्य ज्ञा
निनः यथापतितेन यथाप्राप्तेन वर्तते तिष्ठति तस्य तथापतितवर्तिनः सर्वत्र प्रारब्धप्राप्ते सद्वस्तुन्यसद्वस्तुनि च तुष्टिरात्मतोष एव तथा स्वच्छंदं अ

पतत्विति देहः पततु म्रियतां वा। अथवा उदके तु जीवतु वा अयथापि अस्य ज्ञानिनः निश्चिंतानं भवति। कीदृशस्य स्वभावो नाम भूमिर्ज्ञानस्वरू
प स एव भूमिस्तत्र विश्रांत्या विस्मृतसमस्तसंसारस्य ॥८६॥ ॥अकिंचन इति। केवलो निर्विकारो बुधो रमते। कीदृशः अकिंचनः नास्ति किंचन परिग्र
हो यस्य सः अकिंचनः अत एव कामचारः विधिनिषेधाकिंकरः स्वच्छंदचारी अतः निर्द्वंद्वः सुखदुःखादिरहितः। छिन्नसंशयः अद्वैते संशयशून्यः निर्मम
इति। धीरो ज्ञानी शोभते दीप्यते यतो निर्ममः अत एव समलोष्टाश्मकांचनः ज्ञानबलेन सुभिन्नो हृदयग्रंथिरहंकारो यस्य सः तथा निर्धूतरजस्त
मसी यस्य सः ॥८८॥ ॥सर्वत्रेति। सर्वत्र सर्वेषु विषयेषु अनवधानस्य एकाग्रतारहितस्य। तथा न किंचिद्वासना हृदि मुक्तात्मनः कर्तृत्वाद्यध्यासर
हितात्मनः अत एवात्मानंदेन विशेषेण तृप्तस्य केन तुलना जायते। ज्ञानिव्यतिरिक्तस्य ईदृशस्याभावादित्यर्थः ॥८९॥ ॥अतुलनामेव विशेष

पततूदेतु वा देहो नास्य चिंता महात्मनः। स्वभावभूमिविश्रांतिविस्मृताशेषसंसृतेः ॥८६॥ ॥अकिंचनः कामचारो निर्द्वंद्वश्छिन्नसंशयः। असक्तः
सर्वभावेषु केवलो रमते बुधः ॥८७॥ ॥निर्ममः शोभते धीरः समलोष्टाश्मकांचनः। सुभिन्नहृदयग्रंथिर्विनिर्धूतरजस्तमाः ॥८८॥ ॥सर्वत्रा
नवधानस्य न किंचिद्वासना हृदि। मुक्तात्मनो वितृप्तस्य तुलना केन जायते ॥८९॥ ॥जानन्नपि न जानाति पश्यन्नपि न पश्यति। ब्रुवन्न
पि न च ब्रूते कोऽन्यो निर्वासनादृते ॥९०॥ भिक्षुर्वा भूपतिर्वापि यो निष्कामः स शोभते। भावेषु गलिता यस्य शोभनाशोभना मतिः ॥९१॥ क्व स्वाच्छं
द्यं क्व संकोचः क्व वा तत्त्वविनिश्चयः। निर्व्याजार्जवभूतस्य चरितार्थस्य योगिनः ॥९२॥ ॥

णविशारदयति। जानन्निति। निर्वासनात् ज्ञानिनस्तु ऋते अन्यः को लोकदृष्ट्या मनसा जानन्नपि वस्तु न जानाति तथा चक्षुषा पश्यन्नपि वस्तु नो न पश्यति।
ब्रुवन्नपि न च ब्रूते कर्तृत्वाभिमानाभावादित्यर्थः ॥९०॥ ॥भिक्षुरिति। यस्य ज्ञानिनः उत्कृष्टेषु भावेषु शोभना अपकृष्टेषु अशोभनत्वावगाहिनी मतिर्ग
लिता अत एव यो निष्कामः स भूपतिर्वा जनकादिवत् भिक्षुर्वा याज्ञवल्क्यादिवत् शोभत एव भावेषु निर्विकल्पत्वाच्छास्यते तस्य न बंधायेत्यर्थः ॥९१॥
क्वेति। योगिनः निर्व्याजमकपटं यदार्जवं ऋजुबुद्धिस्तद्रूपस्य आत्मनिष्ठत्वाच्चरितार्थस्य अन्वर्थनाम्नः स्वाछंद्यं स्वेच्छयाचारित्वं क्व तथा संकोचः प्र
वृत्त्यादिसंवरणं क्व तत्त्वविनिश्चयः क्व कर्तृत्वं वा क्व कर्तृत्वाध्यासाभावात् अत एव निर्व्याजं यदार्जवं वक्रबुद्ध्यभावस्तद्रूपस्य ॥९२॥ ॥श्रीगुरवे नमः॥ ॥

अ॰टी॰

॥२५॥ आत्मेति। आत्मनि विश्रांत्यात् तृप्तेन अत एवाशारहितेन अत एव गतार्तिना गतदुःखेन ज्ञानिना यदंतःकरणेनुभूयेत तत् कथं प्रकारधर्ममाश्रित्य कथ्य
ते प्रकारस्यैव धर्मस्याभावात्। कस्य वा अधिकारिणः कथ्यते तादृशाधिकारिणो भवात्॥१३॥ ॥सुप्त इति। धीरः सुषुप्तोपि न सुप्तः स्वप्नेपि शयितो
न न जागरेपि न जागर्ति अवस्थावत्तया बुद्धिस्तद्विविक्तित्वात्मनस्त्वात्। इदमेवाभिप्रेत्याह। पदे पदे क्षणेऽविरतं नित्यानंदानुभवत्तृप्तः॥१४॥ ॥ज्ञः क्षणेऽ
इति। ज्ञो ज्ञानी लोकदृष्ट्या चिंतादिसहितोपि वस्तुतस्तद्रहितं विविक्तात्मदर्शित्वात्॥१५॥ ॥न सुखीति। लोकगत्या सुखीत्यादिरूपोपि वस्तुत
स्तद्रहितः अंतःकरणाध्यासरहितत्वात्। न विरक्तो विषयदृष्ट्याभावात् न वा मुक्तः॥१६॥ ॥पूर्वमपीति। धन्यो ज्ञानी लोकदृष्ट्या विक्षेपोपि वस्तुतो न वि
क्षिप्तः स्वप्रकाशात्मानुभावात्। लोकदृष्ट्या समाधौ प्रतीयमानेपि न समाधिः। समाधिकर्तृत्वाध्यासाभावात्। लोकदृष्ट्या जाड्ये प्रतीयमाने न जडः सा

आत्मविश्रांतितृप्तेन निराशेन गतार्तिना॥ अंतर्यदनुभूयेत तत् कथं कस्य कथ्यते॥१३॥ ॥सुप्तोपि न सुषुप्तो च स्वप्नेपि शयितो न च॥ जाग
रेपि न जागर्ति धीरस्तृप्तः पदे पदे॥१४॥ ॥ज्ञः सचिंतोपि निश्चिंतः सेंद्रियोपि निरिंद्रियः॥ सबुद्धिरपि निर्बुद्धिः साहंकारोनहंकृतिः॥१५॥
न सुखी न च वा दुःखी न विरक्तो न संगवान्॥ न मुमुक्षुर्न वा मुक्तो न किंचिन्न च किंचन॥१६॥ विक्षेपेपि न विक्षिप्तः समाधौ न समाधिमान्॥
जाड्येपि न जडो धन्यः पांडित्येपि न पंडितः॥१७॥ ॥मुक्तो यथास्थितिस्वस्थः कृतकर्तव्यनिर्वृतिः॥ समः सर्वत्र वैतृष्ण्यान्न स्मरत्य
कृतं कृतं॥१८॥ ॥न प्रीयते वंद्यमानो निंद्यमानो न कुप्यति॥ नैवोद्विजति मरणे जीवने नाभिनंदति॥१९॥ ॥न धावति जनाकीर्णं ना
रण्यमुपशांतधीः॥ यथातथा यत्र तत्र सम एवावतिष्ठते॥२०॥ ॥इति शांतिशतकं॥ ॥नुभवशालित्वात्। लोकदृष्ट्या पांडित्ये प्रतीयमाने न पं
डितः पंडितोहमित्यभिमानाभावात्॥१७॥ ॥मुक्त इति। मुक्तः प्रारब्धवशाद्यथाप्राप्तस्थितौ सत्यामपि स्वस्थचित्तः तथा कृतपूर्वकृते कर्तव्ये करिष्यामीत्या
कर्मणि निवृत्तः संतुष्टः अभिनिवेशाद्वा तृष्ण्यं अत एव सर्वत्र समः वैतृष्ण्यात्। इदमकृतं इदं च कृतं इति न स्मरति॥१८॥ ॥न प्रीयत इति। केनचित् स्तूय
वंद्यमानो न तुष्यति निंद्यमानो न कुप्यति मरणे उपस्थिते सति उद्वेगं न प्राप्नोति। आत्मनो नित्यत्वानुसंधानात्। अत एव जीवने सति नाभिनंदति न
कुप्यति। न धावतीति। उपशांतधीः पुरुषः जनाकीर्णप्रदेशं नानुधावति। नाप्यरण्यं सर्वत्र शांतत्वात्। यथा तथा जनसंमर्दे तदसंमर्दे प्रकारेणावाय यत्र तत्र व ॥२५॥
ने वा पदे नेवा सम एव स्वस्थचित्त एवावतिष्ठते। आत्मात्मसाक्षात्कारत्वात्॥२०॥ ॥इति श्रीमिद्धेश्वरविरचितायां अष्टावक्रटीकायां शांतिशतकप्रकरणं स
माप्तं॥१७॥ छ॥ छ॥ ॥श्री॥

आशानिरूप्यत्वादित्यर्थः

साध्यसाधनस्वरेण ज्ञाने ज्ञाने गुरोर्मुखात्। शिष्यस्यात्मनि विश्रान्तिमष्टभिः प्राह सस्फुटं॥१॥ ॥एवं तत्त्वज्ञानिनः स्वभावभूतां विवेकादयोपि मम
न संतीत्यर्थः॥१॥ ॥श्रांतिं श्रुत्वास्य कृतार्थतया गुरुं परितोषयितुं आत्मविश्रांत्यष्टकं शिष्यः स्वयमाह। तत्त्वेति। हि गुरो मया भवतः सकाशात् तत्त्व
विज्ञानोपदेशमादाय स्वहृदयोदरात् नानाविधापरामर्शएव यच्छल्यं तस्य उद्धारः अपहारः कृतः॥१॥ ॥तदेव स्पष्टयति क्व धर्मइति। धर्मार्थकामा अ
पि हृदयोदरात् निरस्ताः क्षिपिष्णुत्वादित्यर्थः। स्वमहिम्नि स्थितस्य मे मम विवेकता क्व द्वैतं अद्वैतं क्व च। चिन्मात्रविश्रांतस्य विवेकानुपयोगात् उत्ता
त्तु परपारे नोक्तायाः किंप्रयोजनमिति। द्वैतस्य च ज्ञानबाधितत्वात्। अद्वैतस्य द्वैतसापेक्षत्वेनास्वाभानास्वाभाविकत्वात्। क्व द्वैतमित्युक्तमे
॥२॥ व विशेषतः प्रपंचयति क्व भूतमिति। कालस्यापि मम आस्फुर्तत्वात्तदुपाधिका भूतभविष्यद्वर्तमाना अपि न संतीत्यर्थः॥३॥ ॥क्व चात्मेति अतति व्या

तत्त्वविज्ञानसंदंशमादाय हृदयोदरात्॥ नानाविधपरामर्शशल्योद्धारः कृतो मया॥१॥ ॥क्व धर्मः क्व च वा कामः क्व चार्थः क्व विवेकिता॥
क्व द्वैतं क्व च वाद्वैतं स्वमहिम्नि स्थितस्य मे॥२॥ ॥क्व भूतं क्व भविष्यद्वा वर्तमानमपि क्व वा॥ क्व देशः क्व च वा नित्यं स्वमहिम्नि स्थितस्य मे॥३॥
क्व चात्मा क्व च वानात्मा क्व शुभं क्वाशुभं तथा॥ क्व चिंता क्व च वा चिंता स्वमहिम्नि स्थितस्य मे॥४॥ ॥क्व स्वप्नः क्व सुषुप्तिर्वा क्व च जाग
रणं तथा॥ क्व तुरीयं भयं वापि स्वमहिम्नि स्थितस्य मे॥५॥ ॥क्व दूरं क्व समीपं वा बाह्यं क्वाभ्यंतरं क्व वा॥ क्व स्थूलं क्व च वा सूक्ष्मं स्वमहि
म्नि स्थितस्य मे॥६॥ ॥क्व मृत्युर्जीवितं वा क्व लोकाः क्वास्य क्व लौकिकं॥ क्व लयः क्व समाधिर्वा स्वमहिम्नि स्थितस्य मे॥७॥ ॥अलं त्रि
वर्गकथया योगस्य कथयाप्यलं॥ अलं विज्ञानकथया विश्रांतस्य ममात्मनि॥८॥ ॥इत्यात्मविश्रांत्यष्टकं समाप्तं॥छ॥छ॥

तेति। व्याप्तात्मा सर्वव्याप्यव्याप्यमपेक्ष्य कथ्यं ते स्वमहिम्नि स्थितस्य च मम आत्मादिकं नास्ति॥४॥ ॥क्व स्वप्न इति। स्वप्नादयो बुद्धेरेवावस्थास्ता मम न सं
ति। एतत्त्रितयाभावे तन्निरूप्यतुरीयावस्थापि मम नास्ति। तथा भयादयोप्यंतःकरणधर्मा मम न संतीत्यर्थः॥५॥ ॥क्व दूरमिति। सर्वत्र परिपू
र्णस्य मम दूरसमीपादिकं नास्ति। तथा भयादयोप्यंतःकरणधर्मा मम न संतीत्यर्थः॥६॥ ॥क्व मृत्युरिति। कालत्रयेपि सद्रूपस्य मम लक्ष्ये क्व
यः क्व समाधिश्च क्व॥७॥ ॥अलमिति। धर्मार्थकामकथया योगाभ्यासकथया विज्ञानकथया चालं। आत्मविश्रांतस्य मम एतेः प्रयो
जनाभावादित्यर्थः॥८॥ ॥ ॥इत्यात्मविश्रांत्यष्टकं॥ ॥आत्मविश्रांत्यभिव्यक्तां स्वभावोक्तिः शांतिनः जीवन्मुक्तिदशां शिष्यचतुर्दशभिरब्रवीत्॥१॥

स्वगुरुकृतात्मविश्रान्तेः फलीभूतो विदुषः स्वभावभूतां नावमुक्तिरष्टांशिष्यश्चतुर्दशश्लोकैर्निरूपयति । क्व भूतेति । निरञ्जने सर्वोपाधिमलशून्ये म-
त्स्वरूपे देहेन्द्रियमनांसि क्व न हि किंचिन्न्यमस्तीत्याह । क्व शून्यमिति । नहि सदात्मनि सति शून्यसंभवतीत्यर्थः ॥१॥ ॥क्वेति । शास्त्रमात्तद्दृश्यमम
शास्त्रं क्व तज्जन्यविज्ञानं च क्व आत्मविश्रान्त्या सर्वस्य गलितप्रायत्वात् । निर्विषमनोपि न तस्यापि गलितप्रायत्वात् । अत एव तृप्तिरपि न तथा । तृप्ति-
साध्यं वितृष्णाविगतत्वमपि न वितृष्णस्यैव गलितप्रायत्वादित्यर्थः ॥२॥ ॥क्व विद्येति । मयि क्व विद्या विद्या यहंकारधर्माः तद्बाह्यवस्तुजातं क्व मम संबंधः ।
क्व हूतीयस्य संबंधिनो भावात् । तथा बंधमोक्षावपि धर्मौ क्व । अत्र हेतुमाह स्वरूपस्येति । निर्विशेषस्वरूपस्य मम रूपिता धर्मवत्ता क्व । तथा च निर्धर्मकस्य म-
यि न विद्यादयो धर्माः न सन्तीति फलितार्थः ॥३॥ ॥प्रारब्धेति । प्रारब्धानि कर्माणि तथा जीवन्मुक्तिस्तथा विदेहकैवल्यमेते धर्माः सदा निर्विशेष-

क्व भूतानि क्व देहो वा क्वेन्द्रियाणि क्व वा मनः ॥ क्व शून्यं क्व च नैराश्यं मत्स्वरूपे निरंजने ॥१॥ ॥क्व शास्त्रं क्वात्मविज्ञानं क्व वा निर्विषयं
मनः ॥ क्व तृप्तिः क्व वितृष्णात्वं गतद्वन्द्वस्य मे सदा ॥२॥ ॥क्व विद्या क्व वा विद्या क्वाहं क्वेदं मम क्व वा ॥ क्व बंधः क्व च वा मोक्षः स्वरूपस्य क्व
रूपिता ॥३॥ क्व प्रारब्धानि कर्माणि जीवन्मुक्तिरपि क्व वा ॥ क्व तद्विदेहकैवल्यं निर्विशेषस्य मे सदा ॥४॥ ॥क्व कर्ता क्व च वा भोक्ता
निष्क्रियं स्फुरणं क्व वा ॥ क्वापरोक्षं फलं वा क्व निःस्वभावस्य मे सदा ॥५॥ ॥क्व लोकः क्व मुमुक्षुर्वा क्व योगी ज्ञानवान् क्व वा ॥ क्व बद्धः
क्व च वा मुक्तः स्वस्वरूपेऽहमद्वये ॥६॥ ॥क्व सृष्टिः क्व च संहारः क्व साध्यं क्व च साधनं ॥ क्व साधकः क्व सिद्धिर्वा स्वस्वरूपेऽहमद्वये ॥
॥७॥ ॥क्व प्रमाता प्रमाणं वा क्व प्रमेयं क्व च प्रमा ॥ क्व किंचित्क्व न किंचिद्वा सर्वदा विमलस्य मे ॥८॥ ॥

स्य मे न सन्तीत्यर्थः ॥४॥ ॥क्व कर्तेति । सदा निःस्वभावस्य मे कर्तृत्वभोक्तृत्व निःक्रियः स्फुरणानि क्व अपरोक्षवृत्तिरूपं ज्ञानं क्व । फलं विषया-
वच्छिन्नं यत्फलं चैतन्यं तत्क्वेत्यर्थः ॥५॥ ॥क्व लोक इति । अहमित्येवं रूपे द्वये अहमद्वये आत्माद्वैते स्वस्वरूपे सति । लोकः क्व । मुमुक्षुः क्व । योगी ज्ञानवान् क्व । बद्धः
क्व । मुक्तश्च क्वेत्यर्थः ॥६॥ ॥क्व सृष्टिरिति । अहमद्वये आत्माद्वैते स्वस्वरूपे सति सृष्टिसंहारौ साध्यसाधने साधकसिद्धी वा क्व ॥७॥ क्व प्रमातेति । सर्वदा विमलस्यो-
पाधिसंबंधमलशून्यस्य मे प्रमातृप्रमाणप्रमेयप्रमासंबंधः क्व । मम किंचित्सामान्यतोन्यपदार्थमात्रं क्व । पदार्थाभावोपि मम क्व । सर्वथा संबंधशू-
न्यत्वादित्यर्थः ॥८॥ ॥

क्व विक्षेप इति। सर्वदा निःक्रियस्य मे विक्षेपादिकाः क्रियाः क्वेत्यर्थः॥९॥ ॥क्व चेष इति। सर्वदा निर्विषयस्य विशेषज्ञानरहितशून्यस्य व्यवहारः व्य
वहारिकपदार्थज्ञानं क्व परमार्थता ज्ञानं च क्व। सुखदुःखादिकमपि क्व॥१०॥ ॥क्व माये ति। सर्वदा विमलस्य उपाधिमलरहितस्य मम माया संसारः प्री
तिर्विरतिश्च वैराग्यं क्व जीवभावो ब्रह्मभावश्च क्व। कार्योपाध्यभावे जीवस्य वक्तुमशक्यत्वात् व्याप्यवस्तु नामभावे ब्रह्मत्वस्य च वक्तुमशक्यत्वा
दित्यर्थः॥११॥ ॥कूटस्थस्य निःक्रियस्य तथा निर्विभागस्य भेदरहितस्य सर्वदा स्वस्थस्य मम प्रवृत्तिर्निवृत्तिः क्व। मुक्तिर्बंधनं च क्वेत्यर्थः॥१२॥ ॥
क्वोपदेश इति। निरूपाधेरुपाधिशून्यस्य तथा शिवस्य नित्यानंदरूपस्य उपदेशेन क्रियाः क्व। उपदेशकं च शास्त्रं च क्व मायाद्युपाध्यभावे तत्कृतो
पदेशस्य चाभावात्। अत एव शिष्यो गुरुश्च क्व। स्वयं शिवस्वरूपस्य पुरुषार्थो वा क्व शास्ति॥१३॥ ॥जीवन्मुक्तिदशायामुपसंहरति। क्व वा

का६

क्व विक्षेपः क्व चैकाग्र्यं क्व निर्बोधः क्व मूढता॥ क्व हर्षः क्व विषादो वा सर्वदा निःक्रियस्य मे॥९॥ ॥क्व चैष व्यवहारो वा क्व च सा परमार्थ
ता॥ क्व सुखं क्व च वा दुःखं निर्विमर्शस्य मे सदा॥१०॥ ॥क्व माया क्व च संसारः क्व प्रीतिर्विरतिः क्व वा॥ क्व जीवः क्व च तद्ब्रह्म सर्वदा
विमलस्य मे॥११॥ ॥क्व प्रवृत्तिर्निवृत्तिर्वा क्व मुक्तिः क्व च बंधनं॥ कूटस्थनिर्विभागस्य स्वस्थस्य मम सर्वदा॥१२॥ ॥क्वो
पदेशः क्व वा शास्त्रं क्व शिष्यः क्व च वा गुरुः॥ क्व चास्ति पुरुषार्थो वा निरुपाधेः शिवस्य मे॥१३॥ ॥क्व चास्ति क्व च वा नास्ति क्वा
स्ति चैकं क्व च द्वयं॥ बहुनात्र किमुक्तेन किंचिन्नोत्तिष्ठते मम॥१४॥ ॥इति शिष्यप्रोक्तं जीवन्मुक्तचतुर्दशप्रकरणं समाप्तं॥ ॥

स्तीति॥ मम अस्तीति न स्फुरति असत्त्वापेक्षत्वात् सत्त्वस्य। तथा नास्तीत्यपि न स्फुरति। सत्त्वापेक्षत्वान्नास्तित्वस्य अत एव मिथः सापेक्ष
त्वादेकत्वद्वित्वेपि मम न स्तः प्रत्येकं व्यक्तिभेदेन निषेधस्य कल्पकोटिभिरपि वक्तुमशक्यत्वात् सामान्यत आह॥ बहुनेति। बहुनोक्तेन किं प्र
योजनं मम चिदेकरूपस्य किंचिदपि नोत्तिष्ठते। न प्रकाशत इत्यर्थः॥१४॥ ॥इति श्रीमद्विश्वेश्वरविरचितायामष्टावक्रटीकायां जीवन्मुक्तचतु
र्दशप्रकरणं समाप्तं॥ ॥छ॥ विनेयबुद्धिसौकर्यमुद्दिश्य ग्रंथकृत्स्वयं॥ श्लोकसंख्यां पुरस्कृत्य प्राहानुक्रमयां स्फुटं॥१॥ श्री॥ ॥

अ.टी.
२७१

दशषट्षोडशश्लोकाः गुरुणात्रपदेशोस्युः सोत्र प्रथम प्रकरणे ।पंचविंशतिश्लोकाः शिष्योक्ता[illegible]नुभवोक्तासे द्वितीये प्रकरणेस्युः ।चतुर्दशश्लो
काः स्युर्निक्षेपमुद्दयोक्तोपदेशाख्ये तृतीये प्रकरणेस्युः ॥२॥ ॥षट्उल्लास इति। षट्श्लोकाः शिष्योक्तानुभवोल्लासेस्युस्तुर्यप्रकरणेस्युः च
त्वारः श्लोकाः गुरुप्रोक्ते लयाख्ये पंचम प्रकरणेस्युः पुनश्चत्वारः श्लोकाः गुरुप्रोक्ते प्रतिवादिसिद्धि निलय निषेधोपदेशाख्ये षष्ठे प्रकर
णेस्युः श्लोकानां पंचकं शिष्यप्रोक्तेनुभवाख्ये सप्तमे प्रकरणेस्यात् ॥ श्लोकानां चतुष्कं गुरुप्रोक्ते बंधमोक्षे ष्टमे प्रकरणेस्यात् ॥२॥ ॥नि
र्वेदोपशमइति। श्लोकाष्टकं गुरुप्रोक्ते निर्वेदाख्ये नवमे प्रकरणेस्यात् । गुरुप्रोक्तमुपशमाष्टकं नाम दशमे प्रकरणं शिष्यप्रोक्त
मेवाष्टमं नाम द्वादशप्रकरणं शिष्यप्रोक्तं यथासुखसप्तकं नाम त्रयोदशप्रकरणं शिष्यप्रोक्तं शांतिचतुष्कं नाम चतुर्दशप्रकरणं ॥३॥ तत्त्वोपदेशप

दशाष्ट[illegible]शोस्युः श्लोकाश्चपंचविंशतिः ॥ सत्यात्मानुभवोल्लासस्रपदेशेश्चतुर्दश ॥१॥ ॥षडुल्लासे लयेचैवोपदेशाश्च ३
तुः श्चतुः ॥ पंचकंस्यादनुभवे बंधमोक्षे चतुष्टकं ॥२॥ निर्वेदोपशमे ज्ञाने एवमेवाष्टकं भवेत् ॥ यथासुखेसप्तकंच शांतौस्या
द्वैसंमतिः ॥३॥ तत्त्वोपदेशे विंशाश्च दशज्ञानोपदेशके ॥ तत्त्वस्वरूपे विंशश्च समे चशतकं भवेत् ॥४॥ ॥अष्टकंस्यात्मविश्रां
तौजीवन्मुक्तौ चतुर्दश ॥ षट्संख्याक्रमवि[illegible]ाने ग्रंथैकात्म्यमतः परं ॥५॥ ॥श्रीमहागुरुभ्यो नमः ॥ ॥६॥ ॥

ति विंशति श्लोकाः गुरुप्रोक्ते विशेषोपदेशाख्ये षोडशप्रकरणेस्युः विंशति श्लोकाः गुरुप्रोक्तास्तत्त्वस्वरूपोपदेशाख्ये सप्तदशप्रक
रणेस्युः गुरुप्रोक्तं शमशतकं नामाष्टादशप्रकरणं ॥४॥ ॥अष्टकंचेति। शिष्यप्रोक्तं आत्मविश्रांत्यष्टकं नाम एकोनविंशतिप्रकरणं
शिष्यप्रोक्तं जीवन्मुक्तचतु — — नाम विंशतितम प्रकरणं गुरुप्रोक्तं संख्याक्रमकथनं नामैकविंशप्रकरणं अतः परं षष्टिविंशात्यैकमितैः
खंडैः श्लोकैः ग्रंथैकात्म्यसंख्यो ग्रंथखंडानां वैवेकात्म्यसम्यक्हरूप तया एकात्मत्वमित्यर्थः ॥५॥ ॥ ॥श्रीगुरुवे नमः ॥ ॥६॥ ॥श्री॥ ॥२७॥

विशत्येकेति॥ कियद्भिः खंडैः विंशत्येकमितैः एकविंशतिखंडैरित्यर्थः॥ कियद्भिः श्लोकैः आत्माग्निमध्यखैः जीवात्मपर
मात्मभेदभिन्ना आत्मा द्वौ अग्निस्त्रयः मध्यखं च मध्ये शून्यं अंकानां वामतो गतिरिति न्यायात् अंते द्वौ मध्ये खं आ
[illegible]

॥विंशत्येकमितैः खंडैः श्लोकैरात्माग्निमध्यखैः॥ ॥श्रीमद्गुरुभ्यो नमः॥ श्रीसच्चिदानंदाय
॥अवधूतानुभूतेश्च श्लोकाः संख्याक्रमा अमी॥६॥ ॥यनमः॥ श्रीगोपालाय नमः॥ श्रीरस्तु॥
॥श्रीसांबायनमः॥ श्रीगंगाविश्वेश्वराभ्यां नमः॥ श्रीसीतारामायनमः॥ ॥श्रीरामश्री॥ ॥

द्वैत्रयं ३०२ शताधिकैस्त्रिशतश्लोकैरित्यर्थः॥ श्लोकसंख्यामुपसंहरति अवधूतेति अवधूतानुभूतिरूपो ग्रंथ
येर स्तस्य संख्याक्रमो विद्योतयेषु संख्याक्रमा ईदृशाः श्लोकाः अमी कथिता इत्यर्थः॥६॥ ॥इति श्रीमद्विश्वेश्वरविरचिताया
मष्टावक्रटीकायां संख्यामव्याख्यानं समाप्तोयं टीका॥ ॥ग्रंथसंख्या॥ शत २००॥ मूल ३००० टीका १७००॥ ॥श्री॥ ॥२८॥
॥श्रीकृष्णार्पणमस्तु॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥श्री॥ ॥गु॥ ॥रु॥ ॥भ्यो॥ ॥न॥ ॥मः॥ ॥छ॥ ॥

॥सव्याख्यानं अष्टावक्रं समाप्तं॥

२८